आत्मविद्याविलासः - Atmavidyavilasah Part 1

Graceful Relaxation in the Knowledge of the Self

Written by the Blessed Sadashivendra (Brahmendra) Saraswati who is attached to service of the lotus-like feet of Sri Paramashivendra Saraswati, 57th Shankaracharya of Shri Kanchi Kamakoti Peetham.

17th Century A.D.

Word by Word Through the Lens of अमरकोष

Radhakrishna Chilukuri
San Diego, CA June 2025

Some Other Works of Sadashiva Brahmendra

- Brahma sutra Vrithi,
- Yoga_sudhakara, Yogasuthra Vritti
- Kaivalya_amrutha bindu (based on Upanishads);
- Siddantha_kalpa_valli (a poetic treatise on Appaiah Dikshitar's work),
- Advaita rasa manjari,
- Brahma tattva prakaashikaa
- Guru_rathna_malika
- Navamanimala
- Svapnoditam
- Manoniyamanam
- Sri Dakshinamurti Dhyanam
- Svapnabhutiprakashika
- Atmanusandhanam
- Navavarna Ratnamala
- Atmavidya Vilasa (1)
- Atmavidya Vilasa (2)

Some songs on Brahman

- Sarvam Brahma maya re
- Khelathi Brahmande Bhagavan
- Manasa sanchara re
- Tadvad jeevanam Brahmani

Some songs on Sri Rama

- Pibare Rama rasam,
- Khelathi mama hridaye,
- Bhajare Raghuveeram,
- Cheta Sriramam,
- Prathi varam varam manasa

Some songs on Sri Krishna

- Smara nandakumaram ,
- Gayathi vanamali,
- Bhajare Gopalam maanasa ,
- Bhajare Yadu natham maanasa ,
- Kreedathi vanamali ,
- Bruhi mukundethi

Preface:

Objective

To study and understand the original Sanskrit verses of this venerated poem.

Dwell on each word, preferably through the lens of Amarakosha, to facilitate gentle seepage of understanding.

Dwell on each samaasa, and write vigraha vakyas to ensure translation remains true to the original

Observations

The true intent of the original author may never be truly understood.

Sanskrit is an ancient language, with each word having many meanings.

Perhaps layers of meanings will communicate across centuries, by exploring connotations of each word.

English translations are intended to be true to the अन्वयः, and are not elegant. Hopefully they are of value to those conversant with native vernaculars, and wish to dlve into the Sanskrit original.

Sincerest Gratitude

Sanskrit & Vedanta	Ms. Sudha Emany & Dr. Madugula I. Sastry

Original Print	आत्मविद्याविलासः, श्रीसदाशिवेन्द्रसरस्वत्या विरचितः, श्रीरङ्गस्थ, श्रीवाणीविलासमुद्रायन्त्रालये समुद्रितः । १९११

Recitation	https://www.youtube.com/watch?v=sLyaCsFWHpk
https://youtu.be/JTGlKe0jsEw?feature=shared

Commentary: https://www.youtube.com/watch?v=7AyDpyQkJ5s

Amarakosha	http://amara.aupasana.com/

Dictionaries	https://kosha.sanskrit.today/,
https://arshadrishti.org/golden-dictionary-installation/

Grammar	समासः, जि. महाबलेश्वर भट्टः, संस्कृतभारती, बेङ्गलूरु, २००३
सन्धिः, जि. महाबलेश्वर भट्टः, संस्कृतभारती, बेङ्गलूरु, २००८
https://ashtadhyayi.com/
Vyoma Labs https://www.sanskritfromhome.org/

Other Translations	S. N. Sastri https://www.celextel.org/vedanta-books-other/atma-vidya-vilasa/
Aparyaptamrtah https://www.advaita-vedanta.org/texts/AtmavidyAvilAsaH_trnsln.pdf
V. Narayanan https://www.scribd.com/document/49744798/Atma-Vidya-Vilasa

आत्मविद्याविलासः - १

Graceful Cavorting with Knowledge of the Self - 1

श्रीमत्परमहंसपरिव्राजकाचार्यश्रीपरमशिवेन्द्रसरस्वतीपादाब्जसेवापरायण - श्रीसदाशिवेन्द्रसरस्वत्या विरचितः ।

आत्मविद्याविलास: - sporting with knowledge of the essential self

श्रीमत् परमहंस-परिव्राजक-आचार्य-श्रीपरमशिवेन्द्र-सरस्वती पादाब्ज सेवा-परायण श्रीसदाशिवेन्द्र-सरस्वत्या विरचित:
Written by the Blessed Sadashivendra Saraswati who is attached to service of the lotus-like feet of Sri Paramashivendra Saraswati, blessed supreme swan (ascetic), mendicant teacher (guru).
परिव्राजक: (पुं) परित्यज्य सर्वान् विषयभोगान् व्रजति, परि + व्रज् + ण्वुल् , भ्रमणशील साधु, अवधूत, तपस्वी, सन्यासी

श्रीमत् परमहंस-परिव्राजक-आचार्य-श्रीपरमशिवेन्द्र-सरस्वती – Blessed supreme swan (ascetic), mendicant teacher (guru), Sri Paramashivendra Saraswati
पादाब्ज सेवा परायण – dependent (attached) to service of his lotus feet
श्रीसदाशिवेन्द्र सरस्वत्या विरचित: - written by the Blessed Sadashivendra Saraswati

ॐ

आत्मविद्याविलासः

Composed in Arya metre

चिन्मुद्रितकरकमलं
    चिन्तितभक्तेष्टदं विमलम् ।
गुरुवरमाद्यं कंचन
    निरवधिकानन्दनिर्भरं वन्दे ॥

अन्वयः
चिन्मुद्रितकरकमलं चिन्तितभक्तेष्टदं विमलम् आद्यं निरवधिकानन्दनिर्भरं कञ्चन गुरुवरं वन्दे

I bow to that best of teachers, whose lotus-like hands form the Chin Mudra, who bestows (fulfils) unexpressed desires that are just (merely) thought by faithful, who is sinless, who is the beginning (the source), and is filled with bliss that has no boundary.

शब्दार्थः विवरणं च
चिन्मुद्रितकरकमलं चिन्तितभक्तेष्टदं विमलम्
चिन्मुद्रित-कर-कमलं चिन्तित-भक्त-इष्टदं विमलम्

चिन्मुद्रित - चित्+मुद्रित   अनुनासिकसन्धिः

चिन्मुद्रित – held in the Chin Mudra (Gnyana mudra). thumb and forefinger pressed against each other, all others stretched। Three stretched finger represent the body, mind and sense complex. forefinger (I notion) touches (is united with) the thumb (Brahman). Also, the I notion is held away from the body, mind senses complex.

मुद्रितः - मुद्रा + इतच्

कर कमलं – lotus-like hands

कर (पुं) - भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियाम्। अर्थः – किरणः ray
कर (पुं) - द्विपाद्यो द्विगुणो दण्डो भागधेयः करो बलिः। अर्थः - बलिः
कर (पुं) - ध्वान्तारिदानवा वृत्रा बलिहस्तांशवः कराः। अर्थः – हस्तः
कमल (नपुं) - आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम्। अर्थः - जलम्
कमल (नपुं) - सहस्रपत्रं कमलं शतपत्रं कुशेशयम्। अर्थः - पद्मम्
कमल (पुं) - स्यात्कुरङ्गेऽपि कमलः प्रावारेऽपि च कम्बलः। अर्थः – हरिणः

चिन्तित – what has been thought

भक्तेष्टदं – भक्त + इष्टदं   गुण सन्धिः

भक्त – by faithful

भक्त (नपुं) - भिस्सा स्त्री भक्तमन्धोऽन्नमोदनोऽस्त्री सदीदिविः। अर्थः – सिद्धान्नम्

इष्टदं – gives what is desired

इष्ट (नपुं) - त्रिष्वथ क्रतुकर्मेष्टं पूर्तं खातादि कर्म यत्। अर्थः - यज्ञकर्मः

इष्ट (नपुं) - कामं प्रकामं पर्याप्तं निकामेष्टं यथेप्सितम्। अर्थः – यथेप्सितम्

विमलम् - stainless, pure

मल (पुं-नपुं) - तिलकं क्लोम मस्तिष्कं गोर्दं किट्टं मलोऽस्त्रियाम्। अर्थः - मलम्

मल (पुं-नपुं) - मलोऽस्त्री पापविट्किट्टान्यस्त्री शूलं रुगायुधम्। अर्थः - पापम्

मल (पुं-नपुं) - मलोऽस्त्री पापविट्किट्टान्यस्त्री शूलं रुगायुधम्। अर्थः - पुराणकिट्टम्

गुरुवरमाद्यं कंचन निरवधिकानन्दनिर्भरं वन्दे

गुरुवरम् आद्यं कंचन निरवधिक-आनन्द-निर्भरं वन्दे

गुरुवरम् – best of gurus

गुरु (पुं) - बृहस्पतिः सुराचार्यो गीर्पतिर्धिषणो गुरुः। अर्थः – बृहस्पतिः jupiter

गुरु (पुं) - उपाध्यायोऽध्यापकोऽथ स्यान्निषेकादिकृद्गुरुः। अर्थः – संस्कारादिकर्तुर्गुरुः

वर (नपुं) - काश्मीरजन्माग्निशिखं वरं वाह्लीकपीतने। अर्थः - कुङ्कुमम्

वर (पुं) - व्यधो वेधे पचा पाके हवो हूतौ वरो वृत्तौ। अर्थः - वेष्टनसम्भक्तिः

वर (पुं) - देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीबं मनाक्प्रिये। अर्थः - देवाद्वृतः, मनाक्प्रियः, श्रेष्ठः

आद्यं – first (one who is the origin)

आद्य (वि) - पुंस्यादिः पूर्वपौरस्त्यप्रथमाद्या अथास्त्रियाम्। अर्थः – आद्यः

कंचन – to that one, whoever

निरवधिकानन्दनिर्भरं = निरवधिक आनन्दनिर्भरं   सवर्ण दीर्घ स्वरसन्धिः

निरवधिक – infinite (अवधिक = occuring after)

अधिक (वि) - नीवी परिपणो मूलधनं लाभोऽधिकं फलम्। अर्थः – अधिकफलम्.

आनन्द – bliss

आनन्द (पुं) - स्यादानन्दथुरानन्दः शर्मशातसुखानि च। अर्थः – आनन्दः Joy

निर्भरं – filled with

निर्भर (नपुं) – अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरम्। अर्थः – अतिशयः excessive

निर्भर (वि) - बलवत्सुष्ठु किमुत स्वत्यतीव च निर्भरे। अर्थः - अतिशयः

वन्दे - I bow down

<u>समासा:</u>

चिन्मुद्रितकरकमलं

चित्+मुद्रितकरकमलं

मुद्रितं करकमलं – कर्मधारय   प्राय: उत्तरपदार्थप्रधान: तत्पुरुष:

मुद्रितकरं कमलं – कर्मधारय   विशेषणं उत्तरपदम् ??

चिन्तितभक्तेष्टदं

चिन्तितं भक्तेष्टदं - कर्मधारय

चिन्तितभक्तस्य इष्टं – षष्ठी तत्पुरुष

चिन्तितभक्तेष्टं दं - कर्मधारय

निरवधिकानन्दनिर्भरं

निरवधिकेन आनन्दनिर्भरं – केवल समास: ??

निरवधिकानन्देन निर्भरं – केवल समास: ??

वटतरुनिकटनिवासं

पटुतरविज्ञानमुद्रितकराब्जम् ।

कंचन देशिकमाद्यं

कैवल्यानन्दकन्दलं वन्दे ॥१॥

<u>अन्वय:</u>

कंचन देशिकमाद्यं, वटतरु-निकट-निवासं. पटुतर-विज्ञान-मुद्रित-कराब्जम्, कैवल्यानन्द-कन्दलं वन्दे ॥१॥

I pay obeisance, to that original primordial teacher, who abides near a fig tree, most skilled (in) knowledge-experience (of Brahman), with lotus-like hands forming a jnana-mudra, who is filled with the bliss of aloneness-oneness.

<u>शब्दार्थ: विवरणं च</u>

वटतरुनिकटनिवासं पटुतरविज्ञानमुद्रितकराब्जम्

वट-तरु-निकट-निवासं पटुतर-विज्ञान-मुद्रित-कर-अब्जम्

वट-तरु – fig tree

वट (पुं) - प्लक्षो जटी पर्कटी स्यान्न्यग्रोधो बहुपाद्वटः। अर्थः - वटवृक्षः

तरु (पुं) - वृक्षो महीरुहः शाखी विटपी पादपस्तरुः। वनौषधिवर्गः । अर्थः – वृक्षः

निकट – near, proximate

निकट (विं) - समीपे निकटासन्नसन्निकृष्टसनीडवत्। अर्थः - समीपः

निवासं – house, dwelling, residing

वास (पुं) - वासः कुटी द्वयोः शाला सभा सञ्जवनं त्विदम्। अर्थः - सभागृहम्

वास (नपुं) - वस्त्रमाच्छादनं वासश्चैलं वसनमंशुकम्। मनुष्यवर्गः। अर्थः - वस्त्रम्

पटुतर – most intelligent

पटु (विं) - पटुर्द्वौ वाच्यलिङ्गौ च नीलकण्ठः शिवेऽपि च। नानार्थवर्गः । अर्थः - अमन्दः, औषधम्

पटु (पुं) - सुषवी चाथ कुलकं पतोलस्तिक्तकः पटुः। वनौषधिवर्गः । अर्थः - पटोलः

पटु (पुं) - दक्षे तु चतुरपेशलपटवः सूत्थान उष्णश्च। शूद्रवर्गः । अर्थः - चतुरः

विज्ञान – wisdom

विज्ञान (नपुं) - मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः। धीवर्गः । अर्थः – शिल्पादिविषयकबुद्धिः

मुद्रित – marked, stamped, formed shape

कराब्जम् – कर अब्जम्   सवर्णदीर्घ स्वरसन्धिः ।

कर – hands

कर (पुं) - भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियाम्। अर्थः – किरणः ray

कर (पुं) - द्विपाद्यो द्विगुणो दण्डो भागधेयः करो बलिः। अर्थः - बलिः

कर (पुं) - ध्वान्तारिदानवा वृत्रा बलिहस्तांशवः कराः। अर्थः – हस्तः

अब्जम् – lotus, moon

अब्ज (पुं) - अब्जो जैवातृकः सोमो ग्लौर्मृगाङ्कः कलानिधिः। अर्थः – चन्द्रः moon

अब्ज (पुं) - अब्जौ शङ्खशशाङ्कौ च स्वके नित्ये निजं त्रिषु। अर्थः - शङ्खः

कंचन देशिकमाद्यं कैवल्यानन्दकन्दलं वन्दे

कंचन देशिकम्-आद्यं कैवल्य-आनन्द-कन्दलं वन्दे

कंचन – someone whoever

देशिकम् – guru, guide, traveller, one familiar with local places

देशिक (पुं) - पेटकस्त्रिषु वृन्देऽपि गुरौ देश्ये च देशिकः। नानार्थवर्गः । अर्थः - संस्कारादिकर्तुर्गुरुः, देश्यः

आद्यं – original, source

आद्य (वि) - पुंस्यादिः पूर्वपौरस्त्यप्रथमाद्या अथास्त्रियाम्। विशेष्यनिघ्नवर्गः । अर्थः – आद्यः

कैवल्यानन्द – कैवल्य आनन्द सवर्णदीर्घ स्वरसन्धिः ।

कैवल्य – solitariness

कैवल्य (नपुं) - मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम्। धीवर्गः । अर्थः - मोक्षः

आनन्द – bliss

कन्दलं - filled with

वन्दे - I bow down to

वन्दे – आत्मनेपदी लट् लकार: उत्तम ए

<u>समासा:</u>

वटतरुनिकटनिवासं

पटुतरविज्ञानमुद्रितकराब्जम्

देशिकमाद्यं

कैवल्यानन्दकन्दलं

निरवधिसंसृतिनीरधि-

निपतितजनतारणस्फुरन्नौकाम् ।

परमतभेदनघुटिकां

परमशिवेन्द्रार्यपादुकां नौमि ॥२॥

<u>अन्वय:</u>

निरवधि-संसृति-नीरधि-निपतित-जन-तारण-स्फुरन्नौकाम् परमत-भेदन-घुटिकां परम-शिवेन्द्रार्य-पादुकां नौमि ।

I bow to the worthy sandals of Paramashivendra, which are a throbbing boat that saves (carries across) people who have fallen into the boundless moving ocean (samsara), and which breaks into pieces the ankle of other beliefs (duality)

Paramashivendra, was the Guru of Sadashiva Brahmendra.

शब्दार्थः विवरणं च

निरवधिसंसृतिनीरधिनिपतितजनतारणस्फुरन्नौकाम्

निरवधि-संसृति-नीरधि-निपतित-जन-तारण-स्फुरत्-नौकाम्

निरवधि – endless, without break

निरवधि, संसृति, नीरधि – इकारान्त स्त्रीलिङ्ग, प्र ए

अवधि (पुं) - विधुर्विष्णौ चन्द्रमसि परिच्छेदे बिलेऽवधिः। नानार्थवर्गः। अर्थः – परिच्छेदः, बिलम्

संसृति – world, transmigration (from flow, trembling, moving)

सृति (स्त्री) - अयनम्वर्त्म मार्गाध्वपन्थानः पदवी सृतिः। भूमिवर्गः। अर्थः - मार्गः

नीरधि – ocean

नीर (नपुं) - अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम्। वारिवर्गः । अर्थः – जलम्

निपतित – fallen into (sunk)

जन - person, people

तारण - act of crossing, act of transport, recovery

स्फुरन्नौकाम् – स्फुरत्+ नौकाम्		अनुनासिकसन्धिः

स्फुरत् – throbbing, trembling, quivering

स्फुरत् शब्दः - पुँ स्फुरन् , स्त्री स्फुरन्ती, नपुँ स्फुरत्, नपुँ सफुरत् स्फुरती/स्फुरन्ती स्फुरन्ति

स्फुर् धातु शतृ प्रत्यय

स्फुरण (नपुं) - विधा समृद्धौ स्फुरणे स्फुरणा प्रमितौ प्रमा। सङ्कीर्णवर्गः । अर्थः - स्फुरणम्

नौकाम् - boat

परमतभेदनघुटिकां परमशिवेन्द्रार्यपादुकां नौमि

परमत-भेदन-घुटिकां परमशिवेन्द्र-आर्य-पादुकां नौमि

परमत - other ideas

भेदन - breaking, destroying

घुटिकां - ankle

घुटिका (स्त्री) - तद्ग्रन्थी घुटिके गुल्फौ पुमान्पार्ष्णिस्तयोरधः। मनुष्यवर्गः । अर्थः – पादग्रन्थी

परमशिवेन्द्रार्य – परमशिवेन्द्र+आर्य -	सवर्णदीर्घ स्वरसन्धिः ।

परमशिवेन्द्र – Paramashivendra (guru)

आर्य - excellent, respect worthy, noble

आर्य (पुं) - अम्बा माताथ बाला स्याद्वासूरार्यस्तु मारिषः। नाट्यवर्गः । अर्थः - मान्यः

आर्य (पुं) – महाकुलकुलीनार्यसभ्यसज्जनसाधवः। ब्रह्मवर्गः । अर्थः – कुलीनः

पादुकां - footwear, sandals

पादुका (स्त्री) - भारयष्टिस्तदालम्बि शिक्यं काचोऽथ पादुका। शूद्रवर्गः । अर्थः – पादुका

नौमि – I bow down

नौमि – नु धातुः, लट्, उत्तम ए

समासा:

निरवधिसंसृतिनीरधि

निपतितजनतारण

परमतभेदनघुटिकां

परमशिवेन्द्रार्यपादुकां

देशिकपरमशिवेन्द्रा-

देशवशोद्बुद्धदिव्यमहिमाऽहम् ।

स्वात्मनि विश्रान्तिकृते

सरसं प्रस्तौमि किञ्चिदिदम् ॥३॥

अन्वय:

अहम्, स्वात्मनि विश्रान्ति-कृते, देशिक-परमशिवेन्द्र-आदेशवश-उद्बुद्ध-दिव्य-महिमा, सरसं किञ्चित् इदम् प्रस्तौमि

For the sake of relaxing in my own Self, I passionately present/praise, a little, this divine greatness, that has budded under the instruction from Guru Paramashivendra

शब्दार्थ: विवरणं च

देशिकपरमशिवेन्द्रादेशवशोद्बुद्धदिव्यमहिमाऽहम्

देशिक-परमशिवेन्द्र-आदेशवश-उद्बुद्ध-दिव्य-महिमा-अहम्

देशिक - Guru

देशिक (पुं) - पेटकस्त्रिषु वृन्देऽपि गुरौ देश्ये च देशिकः। नानार्थवर्गः । अर्थः - संस्कारादिकर्तुर्गुरुः, देश्यः

परमशिवेन्द्र= परमशिव+इन्द्र गुण स्वरसन्धि:

परमशिवेन्द्र – name of guru

परमम् (अव्य) - प्राकाश्ये प्रादुराविः स्यादोमेवं परमं मते । अव्ययवर्गः। अर्थः - अनुमतिः

परमशिवेन्द्रादेशवश = परमशिवेन्द्र + आदेशवश सवर्णदीर्घ स्वरसन्धिः ।

आदेशवश – under the influence of teaching

वश (पुं) - ग्रहे ग्राहो वशः कान्तौ रक्षणस्त्राणे रणः क्वणे। सङ्कीर्णवर्गः । अर्थः – इच्छा

शिवेन्द्रादेशवशोद्बुद्ध = शिवेन्द्रादेशवश + उद्बुद्ध गुण स्वरसन्धि:

उद्बुद्ध = उत् + बुद्ध जशत्व व्यञ्जन सन्धि:

उद्बुद्ध – awakened knowledge

बुद्ध (पुं) - सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः। स्वर्गवर्गः ।नअर्थः – बुद्धः buddha

बुद्ध (वि) - बुद्धं बुधितं मनितं विदितं प्रतिपन्नमवसितावगते। विशेष्यनिघ्नवर्गः । अर्थः – अवगतम्

दिव्यमहिमाऽहम् = दिव्यमहिमा:+अहम् विसर्गसन्धी लोप:

दिव्य - divine

महिमा greatness

महिमन् शब्द (पुङ्) – महिमा महिमा (स्त्री)

महिमन् (पुं) - अणिमा महिमा चैव गरिमा लघिमा तथा। स्वर्गवर्गः । अर्थः – सिद्धिः siddhi

अहम् – I

स्वात्मनि विश्रान्तिकृते सरसं प्रस्तौमि किञ्चिदिदम्

स्वात्मनि विश्रान्ति-कृते सरसं प्रस्तौमि किञ्चिद्-इदम्

स्वात्मनि विश्रान्तिकृते – सप्तमी ए

स्वात्मनि – in my self

स्व (पुं) - सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः। मनुष्यवर्गः । अर्थः - सगोत्रः

स्व (पुं) - स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने । नानार्थवर्गः । अर्थः - आत्मा, धनम्, आत्मीयम्

आत्मन् (पुं)- क्षेत्रज्ञ आत्मा पुरुषः प्रधानं प्रकृतिः स्त्रियाम्। कालवर्गः । अर्थः – आत्मा Soul

आत्मन् (पुं) - आत्मायत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च। नानार्थवर्गः । अर्थः - ब्रह्मा, बुद्धिः, स्वभावः, देहः, धृतिः, यत्नः

विश्रान्तिकृते – on account of relaxation

सरसं – with sweetness

रस (पुं) - रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी। धीवर्गः । अर्थः - रसनेन्द्रियविषयः

रस (पुं) - क्षारः काचोऽथ चपलो रसः सूतश्च पारदे। वैश्यवर्गः । अर्थः - पारदः

रस (पुं) - वोलगन्धरसप्राणपिण्डगोपरसाः समाः। वैश्यवर्गः । अर्थः - गन्धरसः

रस (पुं) - शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः। नानार्थवर्गः । अर्थः - गुणः, रागः, शृङ्गारादिः, विषम्, वीर्यम्, द्रवः

प्रस्तौमि – I praise

प्रस्तौमि – प्र+स्तु धातु, उत्तम ए

किञ्चिदिदम् (किञ्चिद् इदम्) - किञ्चित् = किञ्चिद् जश्त्व व्यञ्जन सन्धिः

किञ्चिदिदम् – a little in this

निरुपमनित्यनिरीहो

निष्कलनिर्मायनिर्गुणाकारः ।

विगलितसर्वविकल्पः

शुद्धो बुद्धश्चकास्ति परमात्मा ॥४॥

<u>अन्वय:</u>

निरुपम-नित्य-निरीहो निष्कल-निर्माय-निर्गुणाकारः विगलित-सर्व-विकल्पः शुद्धो बुद्धः परमात्मा चकास्ति

The highest Self shines - incomparable (unique), eternal, actionless, without blemish, not subject to Maya, not a creation (form) of the three gunas (sattwa, rajas, tamas), all thoughts and choices diluted away, pure, wise (enlightened).

<u>शब्दार्थ: विवरणं च</u>

निरुपमनित्यनिरीहो निष्कलनिर्मायनिर्गुणाकारः ।

निरुपम-नित्य-निरीहो निष्कल-निर्माय-निर्गुण-आकारः ।

निरुपम- incomparable

उपमा (स्त्री) - प्रतिकृतिरर्चा पुंसि प्रतिनिधिरुपमोपमानं स्यात्। शूद्रवर्गः । अर्थः – उपमा

नित्य- everlasting

नित्य (नपुं) - नित्यानवरताजस्रमप्यथातिशयो भरः। स्वर्गवर्गः । अर्थः - अविरतम् continuous

नित्य (वि) - शाश्वतस्तु ध्रुवो नित्यसदातनसनातनाः। विशेष्यनिघ्नवर्गः । अर्थः – नित्यम्

निरीहो – actionless, motionless, desireless

ईहः - ईह्+अच्   (ईह् धातुः - ईहते ईहेते ईहन्ते)

निष्कल- undivided, without parts, without blemish

कल (पुं) - कलो मन्द्रस्तु गम्भीरे तारोऽत्युच्चैस्त्रयस्त्रिषु। नाट्यवर्गः। अर्थः - अव्यक्तमधुरध्वनिः

It must have to do with Kal dhatu. कलयति- to count (सङ्कलन and व्यवकलन are addition and subtraction)

Here is a well-known Mahabharata verse where कला means a part:

यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् ।

तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ॥. (12.171.51)

(The happiness of carnal pleasure and the divine happiness of the gods do not amount to a sixteenth part of the bliss of the relinquishment of desire.—Trans. mine.)

Just consider all the possible joys of this world and also that of the divine worlds. Put them all together.... They all cannot measure to even one sixteenth of the bliss experienced by the person of inner dispassion—Chinmaya International Foundation.

निष्कलङ्क is निर्गतः कलंकः यस्य, one who is without blame, निर् + कल् + अङ्क; कल् is class 10 verb (कलयति), same root as in काल ।

निर्माय- beyond Maya, beyond error, deceitless

निर्गुणाकारः – निर्गुण आकारः   सवर्णदीर्घ स्वरसन्धिः

निर्गुण – not pervaded by Gunas (Sattva, Rajas, Tamas)

आकारः - form

विगलितसर्वविकल्पः शुद्धो बुद्धश्चकास्ति परमात्मा

विगलित-सर्व-विकल्पः शुद्धो बुद्धः-चकास्ति परमात्मा

विगलित- vanished, melted away, disappeared

गलित (वि) - स्रस्तं ध्वस्तं भ्रष्टं स्कन्नं पन्नं च्युतं गलितम्। विशेष्यनिघ्नवर्गः। अर्थः - च्युतम्सर्वज्ञः

सर्व- all

सर्व (पुं) - ईश्वरः शर्व ईशानः शङ्करश्चन्द्रशेखरः। स्वर्गवर्गः। अर्थः – शिवः। shiva

सर्व (वि) - ~~गणनीये तु गणेयं संख्याते गणितमथ~~ समं सर्वम्। विशेष्यनिघ्नवर्गः।अर्थः - समग्रम्

विकल्पः – thoughts, choices

शुद्धो बुद्धः - शुद्धः बुद्धः उकार विसर्ग सन्धिः

बुद्धश्चकास्ति – बुद्धः चकास्ति सकार विसर्ग सन्धिः

शुद्धो - pure

बुद्धः - enlightened, knowledgeable

बुद्ध (पुं) - सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः। स्वर्गवर्गः। अर्थः – बुद्धः buddha

बुद्ध (विं) - बुद्धं बुधितं मनितं विदितं प्रतिपन्नमवसितावगते। विशेष्यनिघ्नवर्गः। अर्थः - अवगतम्

चकास्ति – glows, illuminates

चकास्ति – चकास् धातु – प्रथम पु ए

परमात्मा – highest self

परमात्मा – परमात्मन् शब्द - पुं प्रथमा ए

<u>समासा:</u>

निरुपमनित्यनिरीहो

निष्कलनिर्मायनिर्गुणाकारः ।

विगलितसर्वविकल्पः

स्वाविद्यैकनिबद्धः

कुर्वन्कर्माणि मुह्यमानः सन् ।

दैवाद्विधूतबन्धः

स्वात्मज्ञानान्मुनिर्जयति ॥५॥

<u>अन्वय:</u>

स्वाविद्यैकनिबद्धः मुह्यमानः कर्माणि कुर्वन् सन् । दैवात् स्वात्मज्ञानात् विधूतबन्धः मुनिः जयति।

One, bound by own ignorance, confused, exists performing works. Through Grace and knowledge of one’s true self, a Muni breaks all bonds and emerges victorious.

<u>शब्दार्थ: विवरणं च</u>

स्वाविद्यैकनिबद्धः कुर्वन्कर्माणि मुह्यमानः सन् ।

स्व-अविद्या-एक-निबद्धः कुर्वन्-कर्माणि मुह्यमानः सन्

स्वाविद्यैक – स्वाविद्या एक – वृद्धि स्वरसन्धिः

स्वाविद्या - स्व अविद्या सवर्णदीर्घ स्वरसन्धिः

स्व – one’s own

अविद्या – erroneous knowledge, ego, ignorance,

अविद्या (स्त्री) - मोक्षोऽपवर्गोऽथाज्ञानमविद्याहंमतिः स्त्रियाम्। धीवर्गः। अर्थः – अज्ञानम्

एक - one

एक (वि) - साधारणं तु सामान्यमेकाकी त्वेक एककः। विशेष्यनिघ्नवर्गः। अर्थः - असहायः

एक (वि) - भिन्नार्थका अन्यतर एकस्त्वोऽन्येतरावपि। विशेष्यनिघ्नवर्गः। अर्थः - भिन्नार्थकाः

एक (वि) - वृन्दारकौ रूपिमुख्यावेके मुख्यान्यकेवलाः। नानार्थवर्गः। अर्थः – अन्यः, केवलः, मुख्यः

निबद्धः – bound

बद्ध (वि) - अधिक्षिप्तः प्रतिक्षिप्तो बद्धे कीलितसंयतौ। विशेष्यनिघ्नवर्गः। अर्थः - बद्धः

बद्ध (वि) - बद्धे सन्दानितं मूतमुद्दितं सन्दितं सितम्। विशेष्यनिघ्नवर्गः। अर्थः – बद्धः

कुर्वन् – doing

कुर्वन् – डुकृञ् धातु शतृ प्रत्यय

कर्माणि – tasks, works

कर्मन् (नपुं) - कर्म क्रिया तत्सातत्ये गम्ये स्युरपरस्पराः। सङ्कीर्णवर्गः। अर्थः - क्रिया

मुह्यमानः – confused person, bewildered person

मुह्यमानः – मुह् धातु (उभयपदी) शानच प्रत्यय

सन् – being

दैवाद्विधूतबन्धः स्वात्मज्ञानान्मुनिर्जयति ॥५॥

दैवाद्-विधूत-बन्धः स्व-आत्म-ज्ञानात्-मुनिः-जयति

दैवाद्विधूतबन्धः – दैवात् विधूतबन्धः जश्त्व व्यञ्जन सन्धिः

दैवात् – by chance, by fate, natural

दैव (नपुं) - दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः। कालवर्गः। अर्थः – प्राक्तनशुभाशुभकर्मः Destiny

दैव (नपुं) - अङ्गुल्यग्रे तीर्थं दैवं स्वल्पाङ्गुल्योर्मूले कायम्। ब्रह्मवर्गः। अर्थः - देवतीर्थम्

विधूत – relinquished, repelled, shaken off, unsteady, trembling

धूत (वि) - त्यक्तं हीनं विधुतं समुज्झितं धूतमुत्सृष्टे। विशेष्यनिघ्नवर्गः। अर्थः - उत्सृष्टम्

बन्धः – bundle, pack, connection

बन्धन (नपुं) - आगोऽपराधो मन्तुश्च समे तूद्दानबन्धने। क्षत्रियवर्गः। अर्थः – बन्धनम्

बन्धन (नपुं) - बन्धनं प्रसितिश्चारः स्पर्शः स्प्रष्टोपतप्तरि। सङ्कीर्णवर्गः। अर्थः - बन्धनम्

स्वात्मज्ञानान्मुनिर्जयति स्व आत्मज्ञानान्मुनिर्जयति – सवर्णदीर्घ स्वरसन्धिः ।

मुनिर्जयति – मुनिः जयति रेफः विसर्ग सन्धिः

ज्ञानान्मुनिर्जयति - ज्ञानात् मुनिर्जयति अनुनासिक व्यञ्जन सन्धिः

स्वात्मज्ञानात् – due to self knowledge

स्व (पुं) - सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः। मनुष्यवर्गः। अर्थः - सगोत्रः

स्व (पुं) - स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने। नानार्थवर्गः। अर्थः - आत्मा, धनम्, आत्मीयम्

आत्मन् (पुं) - क्षेत्रज्ञ आत्मा पुरुषः प्रधानं प्रकृतिः स्त्रियाम्। कालवर्गः। अर्थः – आत्मा Soul

आत्मन् (पुं) - आत्मायत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च। नानार्थवर्गः। अर्थः - ब्रह्मा, बुद्धिः

ज्ञान (नपुं) - मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः। धीवर्गः। अर्थः – मोक्षोपयोगिबुद्धिः

मुनिः - ascetic, sage, holy man

मुनि (पुं) - मुनीन्द्रः श्रीघनः शास्ता मुनिः शाक्यमुनिस्तु यः। स्वर्गवर्गः। अर्थः – बुद्धः buddha

मुनि (पुं) - तपस्वी तापसः पारिकाङ्क्षी वाचंयमो मुनिः। ब्रह्मवर्गः। अर्थः - मौनव्रतिः

जयति – wins, conquers, vanquishes, excels, gains the upper hand

समासाः
स्वाविद्या
एकनिबद्धः
विधूतबन्धः
स्वात्मज्ञानात्

मायावशेन सुप्तो
मध्ये पश्यन्सहस्रशः स्वप्नान् ।
देशिकवचःप्रबुद्धो
दीव्यत्यानन्दवारिधौ कोऽपि ॥६॥

अन्वयः
मायावशेन सुप्तो, मध्ये सहस्रशः स्वप्नान् पश्यन्, कोऽपि देशिकवचःप्रबुद्धो आनन्दवारिधौ दीव्यति ॥६॥

Asleep under the spell of Maya, watching thousands of dreams therein, One is awakened by the Teacher's words and shines in the ocean of Bliss.

शब्दार्थः विवरणं च
मायावशेन सुप्तो मध्ये पश्यन्सहस्रशः स्वप्नान् ।
माया-वशेन सुप्तो मध्ये पश्यन्-सहस्रशः स्वप्नान्
माया - Maya
माया (स्त्री) - स्यान्माया शाम्बरी मायाकारस्तु प्रतिहारकः। शूद्रवर्गः। अर्थः - इन्द्रजालादिमाया
वशेन – by Power, influence, control, mastership, authority, subjection, submission
वश (पुं) - ग्रहे ग्राहो वशः कान्तौ रक्षणस्त्राणे रणः क्वणे। सङ्कीर्णवर्गः। अर्थः – इच्छा
सुप्तो मध्ये – सुप्तः मध्ये उकार विसर्ग सन्धिः
सुप्तः - asleep
सुप्तः - स्वप् धातु, क्त
मध्ये – in the midst
मध्य (पुं-नपुं) - मध्यमं चावलग्नं च मध्योऽस्त्री द्वौ परौ द्वयोः। मनुष्यवर्गः। अर्थः - देहमध्यः
मध्य (वि) - न्याय्येऽपि मध्यं सौम्यं तु सुन्दरे सोमदैवते। नानार्थवर्गः। अर्थः - न्याय्यम्
पश्यन् – watching, seeing
पश्यन् – दृश् धातु, शतृ प्रत्यय पुङ्
सहस्रशः – by the thousands (adverb)
स्वप्नान् – dreams
स्वप्न (पुं) - स्यान्निद्रा शयनं स्वापः स्वप्नः संवेश इत्यपि। नाट्यवर्गः। अर्थः – निद्रा

देशिकवचःप्रबुद्धो दीव्यत्यानन्दवारिधौ कोऽपि ॥६॥

देशिक-वचः-प्रबुद्धो दीव्यति-आनन्द-वारिधौ कोऽपि

देशिकवचः – Guru’s words

देशिक (पुं) - पेटकस्त्रिषु वृन्देऽपि गुरौ देश्ये च देशिकः। नानार्थवर्गः। अर्थः - संस्कारादिकर्तुर्गुरुः, देश्यः

वचः - वच शब्दः नपुँ

वचस् (नपुं) - व्याहार उक्तिर्लपितं भाषितं वचनं वचः। शब्दादिवर्गः। अर्थः – वचनम्

प्रबुद्धो दीव्यति – प्रबुद्धः दीव्यति उकार विसर्ग सन्धिः

दीव्यत्यानन्द – दीव्यति आनन्द यण् स्वरसन्धिः

प्रबुद्धो – awakened, wise

प्रबुद्धः - प्र + बुध् धातु क्त प्रत्यय

बुद्ध (पुं) - सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः। स्वर्गवर्गः। अर्थः – बुद्धः buddha

बुद्ध (वि) - बुद्धं बुधितं मनितं विदितं प्रतिपन्नमवसितावगते। विशेष्यनिघ्नवर्गः। अर्थः – अवगतम्

दीव्यति – rejoice, be bright

आनन्द - joy

आनन्द (पुं) - स्यादानन्दथुरानन्दः शर्मशातसुखानि च। कालवर्गः। अर्थः – आनन्दः Joy

वारिधौ – in the sea पु० वारीणि धीयन्तेऽस्मिन् धा—आधारे।

वारिधौ – वारिधि शब्द, सप्तमी ए

वारि (नपुं) - आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम्। वारिवर्गः।अर्थः – जलम्

कोऽपि = क उ अपि = कः अपि उकार विसर्ग सम्धिः + गुण स्वरसन्धिः

कः अपि - who also (whoever indeed)

अपि (अव्य) – गर्हासमुच्चयप्रश्नशङ्कासम्भावनास्वपि। नानार्थवर्गः। अर्थः - गर्हा, प्रश्नः, शङ्का, सम्भावना, समुच्चयः

<u>समासा:</u>

मायावशेन

देशिकवचःप्रबुद्धो

आनन्दवारिधौ

प्राकृतभावमपास्य

स्वीकृतनिजरूपसच्चिदानन्दः ।

गुरुवरकरुणापाङ्गा-

द्रौरवमासाद्य माद्यति प्राज्ञः ॥ ७॥

<u>अन्वय:</u>

गुरुवरकरुणा-अपाङ्गात् प्राकृतभावम् अपास्य, रौरवम्-आसाद्य, स्वीकृतनिजरूपसच्चिदानन्दः, प्राज्ञः माद्यति ॥

As a consequence of a compassionate side-glance of the most exalted Guru, having discarded low tendencies of ignorance, having overcome all types of hellishness, accepting ones true nature of Existence-Conciousness-Bliss, a wise man animatedly rejoices

<u>शब्दार्थ: विवरणं च</u>

प्राकृतभावमपास्य स्वीकृतनिजरूपसच्चिदानन्दः ।

प्राकृत-भावं-अपास्य स्वीकृत-निज-रूप-सत्-चिद्-आनन्दः

प्राकृत – primordial (vulgar), low, ignorant

प्राकृत (पुं) - विवर्णः पामरो नीचः प्राकृतश्च पृथग्जनः। शूद्रवर्गः। अर्थः – नीचः

भाव (पुं) - भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु। नानार्थवर्गः। अर्थः - सत्ता, स्वभावः, अभिप्रायः, चेष्टा, आत्मा, जननम्भावम् - characteristic, character

भाव (पुं) - भगिनीपतिरावुत्तो भावो विद्वानथावुकः। नाट्यवर्गः। अर्थः - विद्वान्

अपास्य – having left, having disregarded

अपास्य – indeclinable

सच्चिदानन्दः = सच्चिद् आनन्दः = सच्चित् आनन्दः जश्त्व व्यञ्जन सन्धिः

सच्चित् = सत् + चित् श्चुत्व व्यञ्जन सन्धिः

स्वीकृत-निजरूप-सच्चिदानन्दः – accepted – own nature – existence knowledge bliss

स्वी – स्व + च्वि प्रत्ययः = स्वी (च्वि indicates transformation)

स्वी indeclinable,

कृत - कृ धातु, क्त प्रत्यय

गुरुवरकरुणापाङ्गाद्रौरवमासाद्य माद्यति प्राज्ञः ॥

गुरुवर-करुणा-अपाङ्गात्-रौरवम्-आसाद्य माद्यति प्राज्ञः

गुरुवरकरुणापाङ्गाद्रौरवम = गुरुवरकरुणापाङ्गात् रौरवम जश्त्व व्यञ्जन सन्धिः

गुरुवरकरुणापाङ्गात् = गुरुवरकरुणा अपाङ्गात् सवर्णदीर्घ स्वरसन्धिः ।

गुरुवर – मोसत exalted (respected) guru, करुणा - grace,

गुरु (पुं) - बृहस्पतिः सुराचार्यो गीर्पतिर्धिषणो गुरुः। दिग्वर्गः। अर्थः – बृहस्पतिः jupiter

गुरु (पुं) - उपाध्यायोऽध्यापकोऽथ स्यान्निषेकादिकृद्गुरुः। ब्रह्मवर्गः। अर्थः - संस्कारादिकर्तुर्गुरुः

वर (नपुं) - काश्मीरजन्माग्निशिखं वरं वाह्लीकपीतने। मनुष्यवर्गः। अर्थः - कुङ्कुमम्

वर (पुं) - व्यधो वेधे पचा पाके हवो हूतौ वरो वृत्तौ। सङ्कीर्णवर्गः। अर्थः - वेष्टनसम्भक्तिः

वर (पुं) - देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीबं मनाक्प्रिये। नानार्थवर्गः। अर्थः - देवाद्वृतः, मनाक्प्रियः, श्रेष्ठः

अपाङ्गात् from the outer corner of the eye (side glance)

अपाङ्ग (पुं) - अपाङ्गौ नेत्रयोरन्तौ कटाक्षोऽपाङ्गदर्शने। मनुष्यवर्गः। अर्थः - नेत्रप्रान्तः

अपाङ्ग (पुं) - गजेऽपि नागमातङ्गावपाङ्गस्तिलकेऽपि च। नानार्थवर्गः। अर्थः - ललाटकृततिलकम्

रौरवम् – unsteadiness, monster, dishonesty, fearfulness

रौरव (पुं) – तद्भेदास्तपनावीचिमहारौरवरौरवाः। नरकवर्गः। अर्थः - नरकभेदः

आसाद्य – having put down? having overcome? (having caused to break, perish or wane)

आसाद्य - आङ् before षद् to go, causal form, ल्यप्

माद्यति – animates, inspires

प्राज्ञः - (wisdom?), wise, learned man

प्राज्ञ (पुं) - धीरो मनीषी ज्ञः प्राज्ञः संख्यावान्पण्डितः कविः। ब्रह्मवर्गः। अर्थः - विद्वान्

समासा:

प्राकृतभावम्

स्वीकृतनिजरूपसच्चिदानन्दः

गुरुवरकरुणापाङ्गात्

श्रीगुरुकृपया सच्चि-

त्सुखनिजरूपे निमग्नधीर्मौनी ।

विहरति कश्चन विबुद्धः

शान्ताहन्तो नितान्तमुदितान्तः ॥८॥

अन्वय:

श्रीगुरुकृपया कश्चन निमग्नधीर्मौनी विबुद्धः शान्ताहन्तो नितान्तमुदितान्तः सच्चित्सुखनिजरूपे विहरति

By the benevolent grace of his Guru, a silent One immersed in contemplation, exceptionally wise, wondrously peaceful, with extraordinary inner happiness, roams within his most intimate Truth-Conciousness-Bliss

शब्दार्थ: विवरणं च

श्रीगुरुकृपया सच्चित्सुखनिजरूपे निमग्नधीर्मौनी ।

श्रीगुरु-कृपया सच्चित् सुख-निजरूपे निमग्न-धीः-मौनी ।

श्रीगुरु – blessed, respected teacher

श्री (स्त्री) - लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया। स्वर्गवर्गः। अर्थः - लक्ष्मी

श्री (स्त्री) - सम्पत्तिः श्रीश्च लक्ष्मीश्च विपत्त्यां विपदापदौ। क्षत्रियवर्गः। अर्थः – धनसमृद्धिः

गुरु (पुं) - बृहस्पतिः सुराचार्यो गीर्पतिर्धिषणो गुरुः। दिग्वर्गः। अर्थः – बृहस्पतिः jupiter

गुरु (पुं) - उपाध्यायोऽध्यापकोऽथ स्यान्निषेकादिकृद्गुरुः। ब्रह्मवर्गः। अर्थः - संस्कारादिकर्तुर्गुरुः

कृपया – through compassion

श्रीगुरुकृपया – कृपा शब्द स्त्री तृतीया ए

कृपा (स्त्री) - कृपा दयानुकम्पा स्यादनुक्रोशोऽप्यथो हसः। नाट्यवर्गः। अर्थः – करुणरसः

सच्चित् सुख – existence knowledge happiness

सच्चित् = सत् + चित् श्चुत्व व्यञ्जन सन्धिः

सत् (पुं) - विद्वान्विपश्चिद्दोषज्ञः सन्सुधीः कोविदो बुधः। ब्रह्मवर्गः। अर्थः - विद्वान्

सत् (वि) - सत्ये साधौ विद्यमाने प्रशस्तेऽभ्यर्हिते च सत्। नानार्थवर्गः। अर्थः - अभ्यर्हितम्, प्रशस्तम्, विद्यमानम्, साधुः, सत्यम्

चित् (स्त्री) – प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतना। धीवर्गः। अर्थः - बुद्धिः

चित् (अव्य) - यत्तद्यतस्ततो हेतावसाकल्ये तु चिच्चन। अव्ययवर्गः। अर्थः – असाकल्यम्

सुख (नपुं) - स्यादानन्दथुरानन्दः शर्मशातसुखानि च। कालवर्गः। अर्थः – आनन्दः

निजरूपे – (within) inner, innate form

निजरूपे – रूप: पुँ सप्तमी ए

निज (वि) - अब्जौ शङ्खशशाङ्कौ च स्वके नित्ये निजं त्रिषु। नानार्थवर्गः। अर्थः - आत्मीयम्

निज (वि) - अब्जौ शङ्खशशाङ्कौ च स्वके नित्ये निजं त्रिषु। नानार्थवर्गः। अर्थः – नित्यम्

रूप (नपुं) - रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी। धीवर्गः। अर्थः – नेत्रेन्द्रियविषयः

निमग्न-धी: - immersed mind

मौनी – silent one

धीर्मौनी = धी: + मौनी रेफः विसर्ग सन्धिः

मौन (नपुं) - उपस्पर्शस्त्वाचमनमथ मौनमभाषणम्। ब्रह्मवर्गः। अर्थः - मौनम्

विहरति कश्चन विबुद्धः शान्ताहन्तो नितान्तमुदितान्तः ॥८॥

विहरति कश्चन विबुद्धः शान्ता-हन्तो नितान्त-मुदित-अन्तः

विहरति – enjoys, plays, roams

कश्चन – somebody, a certain

विबुद्धः – wise person (उपसर्ग वि denotes one who has intimate knowledge, not just intellectual)

बुद्ध (पुं) - सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः। स्वर्गवर्गः ।नअर्थः – बुद्धः buddha

बुद्ध (वि) - बुद्धं बुधितं मनितं विदितं प्रतिपन्नमवसितावगते। विशेष्यनिघ्नवर्गः । अर्थः – अवगतम्

शान्ता-हन्तो – wondrous! peaceful!

शान्त (वि) - दान्तस्तु दमिते शान्तः शमिते प्रार्थितेऽर्दितः। विशेष्यनिघ्नवर्गः। अर्थः - शमनं प्रापितः

नितान्त – exceptionally, extraordinarily, excessive

नितान्तं – नपुङ् नि prefixed to तम to desire, affix क्त and the vowel made long.

नितान्त (नपुं) - तीव्रैकान्तनितान्तानि गाढबाढदृढानि च। स्वर्गवर्गः। अर्थः – अतिशयः

मुदित-अन्तः – rejoicing inside

मुद् (स्त्री) - मुत्प्रीतिः प्रमदो हर्षः प्रमोदामोदसम्मदाः। कालवर्गः। अर्थः – आनन्दः

अन्त (पुं) - अन्तो नाशो द्वयोर्मृत्युर्मरणं निधनोऽस्त्रियाम्। अर्थः - मरणम्

अन्त (पुं-नपुं) - अन्तो जघन्यं चरममन्त्यपाश्चात्यपश्चिमाः। अर्थः – अन्त्यम्

<u>समासा:</u>

श्रीगुरुकृपया

सच्चित्सुखनिजरूपे

निमग्नधीर:

शान्ताहन्तो

गुरुवरकरुणालहरीव्यतिकरभरशीतलस्वान्तः । रमते यतिवर एको निरुपमसुखसीमनि स्वैरम् ॥१॥

<u>अन्वय:</u>

गुरुवर-करुणा-लहरी-व्यतिकर-भर-शीतलस्वान्तः एको यतिवर स्वैरम् निरुपमसुखसीमनि रमते ॥१॥

Waves of mercy from the most exalted Guru pervade and cool inner burdens (mental turmoils) of the One, the best of ascetics, who then of his own free-will revels in regions of incomparable bliss.

<u>शब्दार्थ: विवरणं च</u>

गुरुवरकरुणालहरीव्यतिकरभरशीतलस्वान्तः ।

गुरुवर-करुणा-लहरी-व्यतिकर-भर-शीतलस्वान्तः ।

गुरुवर – best of gurus

गुरु (पुं) - बृहस्पतिः सुराचार्यो गीर्पतिर्धिषणो गुरुः। दिग्वर्गः। अर्थः – बृहस्पतिः jupiter

गुरु (पुं) - उपाध्यायोऽध्यापकोऽथ स्यान्निषेकादिकृद्गुरुः। ब्रह्मवर्गः। अर्थः – संस्कारादिकर्तुर्गुरुः

वर (नपुं) - काश्मीरजन्माग्निशिखं वरं वाह्लीकपीतने। मनुष्यवर्गः। अर्थः - कुङ्कुमम्

वर (पुं) - व्यधो वेधे पचा पाके हवो हूतौ वरो वृत्तौ। सङ्कीर्णवर्गः। अर्थः - वेष्टनसम्भक्तिः

वर (पुं) - देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीबं मनाक्प्रिये। नानार्थवर्गः। अर्थः - देवाद्वृतः, मनाक्प्रियः, श्रेष्ठः

करुणा (स्त्री) – शृङ्गारवीरकरुणाद्भुतहास्यभयानकाः। नाट्यवर्गः। अर्थः - नवरसेष्वेकः

करुणा- kindness, compassion

करुणा (स्त्री) - उत्साहवर्धनो वीरः कारुण्यं करुणा घृणा। नाट्यवर्गः। अर्थः – करुणरसः

लहरी- wave

व्यतिकर – spreading, pervading

भर-शीतल – burdens are cooled

भर (पुं) - नित्यानवरताजस्रमप्यथातिशयो भरः। स्वर्गवर्गः। अर्थः - अतिशयः

शीतल (वि) - तुषारः शीतलः शीतो हिमः सप्तान्यलिङ्गकाः। दिग्वर्गः। अर्थः - शीतलद्रव्यम्

शीतल (पुं) - स्याद्वातकः शीतलोऽपराजिता शणपर्ण्यपि। वनौषधिवर्गः। अर्थः – शणपर्णी

स्वान्तः – inner heart & mind

स्वान्त (नपुं) - चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः। कालवर्गः। अर्थः – मनस्

रमते यतिवर एको निरुपमसुखसीमनि स्वैरम्

रमते यतिवर एको निरुपम-सुख-सीमनि स्वैरम्

रमते – enjoys, sports

यतिवर एको - यतिवर: एको - विसर्ग लोप:

यतिवर – best of sages

यति (पुं) - ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते। ब्रह्मवर्गः। अर्थः – निर्जितेन्द्रिययतिः

एको निरुपमसुखसीमनि – एक: निरुपमसुखसीमनि – उकार: विसर्ग सन्धि

एको – one

एक (वि) - साधारणं तु सामान्यमेकाकी त्वेक एककः। विशेष्यनिघ्नवर्गः। अर्थः - असहायः

एक (वि) - भिन्नार्थका अन्यतर एकस्त्वोऽन्येतरावपि। विशेष्यनिघ्नवर्गः। अर्थः - भिन्नार्थकाः

एक (वि) - वृन्दारकौ रूपिमुख्यावेके मुख्यान्यकेवलाः। नानार्थवर्गः। अर्थः - अन्यः, केवलः, मुख्यः

स्वैर (वि) - मन्दस्वच्छन्दयोः स्वैरः शुभ्रमुद्दीप्तशुक्लयोः। नानार्थवर्गः। अर्थः - अलसः, स्वच्छन्दःनिरुपम – incomparable

सुखसीमनि – waves of happiness

सुख (नपुं) - स्यादानन्दथुरानन्दः शर्मशातसुखानि च। कालवर्गः। अर्थः - आनन्दः

स्वैरम् – freely, of ones own accord

समासा:

गुरुवर

करुणालहरी

व्यतिकरभरशीतलस्वान्तः

यतिवर

निरुपमसुखसीमनि

श्रीदेशिकवरकरुणारविकरसमपोहितान्तरध्वान्तः । विहरन्मस्करिवर्यो निरवधिकानन्दनीरधावास्ते ॥१०॥

अन्वय: - श्रीदेशिकवर-करुणा-रविकर-समपोहित अन्तरध्वान्तः, मस्करिवर्य: निरवधिक-आनन्द-नीरधौ विहरन् आस्ते

With all doubts and inner darkness completely dispelled by rays of mercy from the blessed and exalted teacher, the best of sannyasis roams about the limitless ocean of Bliss.

शब्दार्थ: विवरणं च

श्रीदेशिकवर-करुणा-रविकरसम्-अपोहित-अन्तरध्वान्तः ।

श्रीदेशिकवरकरुणारविकरसमपोहितान्तरध्वान्तः – श्रीदेशिकवरकरुणारविकरसमपोहित अन्तरध्वान्तः

श्रीदेशिकवर – blessed and most excellent guru

श्री (स्त्री) - लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया। स्वर्गवर्गः। अर्थः - लक्ष्मी

श्री (स्त्री) - सम्पत्तिः श्रीश्च लक्ष्मीश्च विपत्त्यां विपदापदौ। क्षत्रियवर्गः। अर्थः – धनसमृद्धिः

देशिक (पुं) - पेटकस्त्रिषु वृन्देऽपि गुरौ देश्ये च देशिकः। नानार्थवर्गः। अर्थः - संस्कारादिकर्तुर्गुरुः, देश्यः

वर (नपुं) - काश्मीरजन्माग्निशिखं वरं वाह्लीकपीतने। मनुष्यवर्गः। अर्थः - कुङ्कुमम्

वर (पुं) - व्यधो वेधे पचा पाके हवो हूतौ वरो वृत्तौ। सङ्कीर्णवर्गः। अर्थः - वेष्टनसम्भक्तिः

वर (पुं) - देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीबं मनाक्प्रिये। नानार्थवर्गः। अर्थः - देवाद्वृतः, मनाक्प्रियः, श्रेष्ठः

करुणा – kindness, pity

करुणा (स्त्री) – शृङ्गारवीरकरुणाद्भुतहास्यभयानकाः। नाट्यवर्गः। अर्थः - नवरसेष्वेकः

करुणा (स्त्री) - उत्साहवर्धनो वीरः कारुण्यं करुणा घृणा। नाट्यवर्गः। अर्थः – करुणरसः

रविकर – sunrays

रवि (पुं) - रविः शुक्रो महीसूनुः स्वर्भानुर्भानुजो विधुः। दिग्वर्गः। अर्थः - पूर्वदिशायाः ग्रहः

रवि (पुं) - भानुर्हंसः सहस्रांशुस्तपनः सविता रविः। दिग्वर्गः। अर्थः – सूर्यः

कर (पुं) - भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियाम्। दिग्वर्गः। अर्थः - किरणः

कर (पुं) - द्विपाद्यो द्विगुणो दण्डो भागधेयः करो बलिः। क्षत्रियवर्गः। अर्थः - बलिः

कर (पुं) - ध्वान्तारिदानवा वृत्रा बलिहस्तांशवः कराः। नानार्थवर्गः। अर्थः – हस्तः

समपोहित – completely removed, taken away, doubts removed by reason

अन्तरध्वान्तः – inner darkness

अन्तर (नपुं) – अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये। अर्थः – अवकाशः, अवधिः, अवसरः, अन्तर्धानम्, अन्तरात्मा, आत्मीयम्, बहिः, बिलम्, भेदः, परिधानम्

ध्वान्त (नपुं) - अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः। पातालभोगिवर्गः। अर्थः – अन्धकारः

विहरन्-मस्करिवर्यो निरवधिक-आनन्द-नीरधौ आस्ते ॥१०॥

विहरन्- enjoy oneself, wandering happily

मस्करिवर्यो – noble mendicants

मस्करिन् (पुं) - भिक्षुः परिव्राट्कर्मन्दी पाराशर्यपि मस्करी। ब्रह्मवर्गः। अर्थः - संन्यासी

वर्य (वि) - मुख्यवर्यवरेण्याश्च प्रवर्होऽनवरार्ध्यवत्। विशेष्यनिघ्नवर्गः। अर्थः – श्रेष्ठम्

निरवधिकानन्दनीरधावास्ते – निरवधिक आनन्दनीरधौ आस्ते

निरवधिक – infinite, no limit

आनन्द- bliss

आनन्द (पुं) - स्यादानन्दथुरानन्दः शर्मशातसुखानि च। कालवर्गः। अर्थः – आनन्दः

नीरधौ – in ocean

नीर (नपुं) - अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम्। वारिवर्गः। अर्थः - जलम्

आस्ते - stays

समासा:

श्रीदेशिकवर

रविकर

अन्तरध्वान्तः

मस्करिवर्यो

निरवधिकानन्दनीरधौ

जनिविपरीतक्रमतो बुद्ध्या प्रविलाप्य पञ्चभूतानि । परिशिष्टमात्मतत्त्वं पश्यन्नास्ते मुनिः शान्तः ॥११॥

अन्वय:

शान्तः मुनिः, जनिविपरीतक्रमतो बुद्ध्या पञ्चभूतानि प्रविलाप्य, परिशिष्टमात्मतत्त्वं पश्यन्नास्ते ॥

The peaceful sage, having subsumed the five great elements by mentally tracing them step-by-step in reverse order to their origin, thereafter remains observing the remnant true nature of Atma

<u>शब्दार्थ: विवरणं च</u>

जनिविपरीतक्रमतो बुद्ध्या प्रविलाप्य पञ्चभूतानि ।

जनि-विपरीत-क्रमतो बुद्ध्या प्रविलाप्य पञ्चभूतानि ।

- जनि – production, mother, birth
    - जनि (स्त्री) - जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः। कालवर्गः। अर्थः – जननम्
- विपरीत - opposite
- क्रमतो – in order, in sequence, gradually, successively
    - क्रमत: - अव्ययं, क्रम् + तसिल्
    - क्रम (पुं) - ध्यानयोगासने ब्रह्मासनं कल्पे विधिक्रमौ। ब्रह्मवर्गः। अर्थः - विधानशास्त्रम्
- बुद्ध्या – through intellect
    - धी (स्त्री), बुद्धि (स्त्री) - बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः। अर्थः – बुद्धिः, Intellect
- प्रविलाप्य – after complete dissolution, absorption, melting, or annihilation
    - प्रविलाप्य = प्र+विलाप्य - लप् धातो: ल्यप् प्रत्यय: ?
    - विलाप (पुं) - अनुलापो मुहुर्भाषा विलापः परिदेवनम्। शब्दादिवर्गः। अर्थः – अनुशोचनोक्तिः
- पञ्चभूतानि – five elements
    - भूत (नपुं) - पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः। स्वर्गवर्गः। अर्थः - देवयोनिः
    - भूत (वि) - लब्धं प्राप्तं विन्नं भावितमासादितं च भूतं च। विशेष्यनिघ्नवर्गः। अर्थः - प्राप्तम्
    - भूत (नपुं) - युक्ते क्ष्मादावृते भूतं प्राण्यतीते समे त्रिषु। नानार्थवर्गः। अर्थः - आवृतम्, अतीतः, भूमिः, प्राणी, युक्तम्

परिशिष्टमात्मतत्त्वं पश्यन्नास्ते मुनिः शान्तः

परिशिष्टम् आत्म-तत्त्वं पश्यन् आस्ते मुनिः शान्तः

- परिशिष्टम् – remaining, what is left
- आत्म-तत्त्वं – reality of Self
    - आत्मन् (पुं) - क्षेत्रज्ञ आत्मा पुरुषः प्रधानं प्रकृतिः स्त्रियाम्। कालवर्गः। अर्थः - आत्मा
    - आत्मन् (पुं) - आत्मायत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च। नानार्थवर्गः। अर्थः – ब्रह्मा, बुद्धिः
    - तत्त्व (नपुं) - विलम्बितं द्रुतं मध्यं तत्त्वमोघो घनं क्रमात्। अर्थः – विलम्बितनृत्यगीतवाद्यम्
- पश्यन्नास्ते = पश्यन्-आस्ते   ङमुटागम सन्धि:
- पश्यन्-आस्ते – sitting/dwelling while watching
    - पश्यन् – दृश् धातु, शतृ प्रत्यय:
- मुनिः - sage
    - मुनि (पुं) - मुनीन्द्रः श्रीघनः शास्ता मुनिः शाक्यमुनिस्तु यः। अर्थः – बुद्धः
    - मुनि (पुं) - तपस्वी तापसः पारिकाङ्क्षी वाचंयमो मुनिः। अर्थः – मौनव्रतिः
- शान्तः – peaceful/calm/serene one
    - शान्त (वि) - दान्तस्तु दमिते शान्तः शमिते प्रार्थितेऽर्दितः। विशेष्यनिघ्नवर्गः। अर्थः - शमनं प्रापितः

समासा:
जनिविपरीतक्रमतो
पञ्चभूतानि
आत्मतत्त्वं

जगदखिलमिदमसारं मायिकमेवेति मनसि मन्वानः । पर्यटति पाटिताशः प्रगलितमदमानमत्सरः कोऽपि ॥ १२ ॥

अन्वय:
इदम् जगद् अखिलम् असारं मायिकम् एव इति मनसि मन्वानः, पाटिताशः प्रगलितमदमानमत्सरः कोऽपि पर्यटति ॥ १२ ॥

That One Special Person roams about, who mentally comprehends this entire world to be unsubstantial and deceptive, who has overcome desires, from whom pride, conceit and envy have dripped away,

शब्दार्थ: विवरणं च
जगद्-अखिलम्-इदम्-असारं मायिकम् एव इति मनसि मन्वानः ।

जगदखिलम् = जगत् अखिलम् जश्त्व सन्धि:

जगद् - universe

जगत् (नपुं) - त्रिष्वथो जगती लोको विष्टपं भुवनं जगत्। अर्थः - लोकः

जगत् (वि) - त्रिष्वितो जगदिङ्गेऽपि रक्तं नील्यादि रागि च। अर्थः – चरम्

अखिलम् - entire

अखिल (वि) - विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम्

अखिल (वि) - विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम्। विशेष्यनिघ्नवर्गः। अर्थः - समग्रम्

इदम् - this

असारं - unprofitable, unsubstantial, useless, essence-less

असार (वि) - असारं फल्गु शून्यं तु वशिकं तुच्छरिक्तके

असार (वि) - असारं फल्गु शून्यं तु वशिकं तुच्छरिक्तके। विशेष्यनिघ्नवर्गः। अर्थः - निःसारम्

मायिकमेवेति = मायिकम् एव इति अच् गुण सन्धि:

मायिकम् – practising deceit

माया (स्त्री) - स्यान्माया शाम्बरी मायाकारस्तु प्रतिहारकः। शूद्रवर्गः। अर्थः – इन्द्रजालादिमाया

मनस् (नपुं) - चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः। अर्थः – मनस्

एव इति – only thus

मनसि – in the mind

मनसि – मनस् शब्द: सकारान्त नपुँ सप्तमी एक

मन्वानः – one who comprehends, enlightened one

मन्वानः – मन्वान शब्द: प्र एक, म्ना + शानच् (म्ना धातु: - मनति, मनत: मनन्ति)

मन् धातु शानच्

पर्यटति पाटित-आशः प्रगलित-मद-मान-मत्सरः क: अपि ॥

पर्यटति – roams, wanders, travels

पर्यटन (नपुं) - व्रज्याटाट्या पर्यटनं चर्या त्वीर्यापथे स्थितिः। ब्रह्मवर्गः। अर्थः – अटनम्

पाटिताशः = पाटितः-आशः विसर्ग लोप:

पाटित-आशः – overcome desires, literally has "taught desires"

पाटितः - पट् धातु, क्त प्रत्यय:

प्रगलित – dripped down

मद-मान-मत्सरः - pride, conceit and envy

मद (पुं) - दर्पोऽवलोकोऽवष्टम्भश्चित्तोद्रेकः स्मयो मदः। नाट्यवर्गः। अर्थः - मदः

मद (पुं) - गण्डः कटो मदो दानं वमथुः करशीकरः। क्षत्रियवर्गः। अर्थः - मदजलम्

मद (पुं) - निगादो निगदे मादो मद उद्वेग उद्भ्रमे। सङ्कीर्णवर्गः। अर्थः – आनन्दः

मान (पुं) - गर्वोऽभिमानोऽहङ्कारो मानश्चित्तसमुन्नतिः। नाट्यवर्गः। अर्थः - अभिमानः

मत्सर (पुं) - मत्सरोऽन्यशुभद्वेषे तद्वत्कृपणयोस्त्रिषु। नानार्थवर्गः। अर्थः - अन्यशुभद्वेषः, अन्यशुभद्वेषबुद्धिः, कृपणः

क: अपि – whoever

अपि (अव्य) – गर्हासमुच्चयप्रश्नशङ्कासम्भावनास्वपि। नानार्थवर्गः। अर्थः - गर्हा, प्रश्नः, शङ्का, सम्भावना, समुच्चयः

<u>समासा:</u>

प्रगलितमदमानमत्सरः

नात्मनि किञ्चिन्माया तत्कार्यं वाऽस्ति वस्तुतो विमले । इति निश्चयवानन्तः हृष्यत्यानन्दनिर्भरो योगी ॥१३॥

<u>अन्वय:</u>

विमले आत्मनि किञ्चित् माया तत् कार्यं वा वस्तुतो न अस्ति । इति निश्चयवान् योगी अन्तः आनन्दनिर्भरो हृष्यति ।

Having ascertained that there is verily neither Maya nor its works in the Pure Self, the Yogi (one united with Self) rejoices within in a Bliss that is beyond measure

<u>शब्दार्थ: विवरणं च</u>

न आत्मनि किञ्चित् माया तत् कार्यं वा अस्ति वस्तुतो विमले

नात्मनि - न आत्मनि सवर्ण दीर्घ स्वरसन्धि:

नात्मनि - not in Atma

आत्मनि – आत्मन् नकारान्त शब्दः सप्तमी एक

आत्मन् (पुं) - क्षेत्रज्ञ आत्मा पुरुषः प्रधानं प्रकृतिः स्त्रियाम्। कालवर्गः। अर्थः - आत्मा

आत्मन् (पुं) - आत्मायत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च। नानार्थवर्गः। अर्थः - ब्रह्मा, बुद्धिः, स्वभावः, देहः, धृतिः, यत्नः

किञ्चिन्माया - किञ्चित् माया अनुनासिक व्यञ्जनसन्धि

किञ्चिन्माया - even a a small amount of Maya

किञ्चित् – अव्ययः

किञ्चित् (अव्य) - किञ्चिदीषन्मनागल्पे प्रेत्यामुत्र भवान्तरे। अव्ययवर्गः। अर्थः - अल्पम्

माया (स्त्री) - स्यान्माया शाम्बरी मायाकारस्तु प्रतिहारकः। शूद्रवर्गः। अर्थः – इन्द्रजालादिमाया

वाऽस्ति – वा अस्ति सवर्ण दीर्घ स्वरसन्धिः

तत् कार्यं वा – or its work

अस्ति - exists

वस्तुतो विमले – वस्तुतः विमले उकार विसर्गसन्धिः + गुण स्वरसन्धिः

वस्तुतो – its reality, in reality

वस्तुतः - अव्ययः

विमले – without blemish

मल (पुं-नपुं) - तिलकं क्लोम मस्तिष्कं गोर्दं किट्टं मलोऽस्त्रियाम्। अर्थः - मलम्

मल (पुं-नपुं) - मलोऽस्त्री पापविट्किट्टान्यस्त्री शूलं रुगायुधम्। अर्थः – पापम्, पुराणकिट्टम्

इति निश्चयवान् अन्तः हृष्यति आनन्दनिर्भरो योगी ॥१३॥

इति निश्चयवान् – one who has thus determined/decided

निश्चयवान् – क्तवतु प्रत्यय ? निश्चयितवान् ?

इति (अव्य) - इति हेतुप्रकरणप्रकर्षादिसमाप्तिषु। नानार्थवर्गः।

निश्चय (पुं) - सन्देहद्वापरौ चाथ समौ निर्णयनिश्चयौ। धीवर्गः। अर्थः – निश्चयः

अन्तः - inside

अन्त (पुं) - अन्तो नाशो द्वयोर्मृत्युर्मरणं निधनोऽस्त्रियाम्। अर्थः - मरणम्

अन्त (पुं-नपुं) - अन्तो जघन्यं चरममन्त्यपाश्चात्यपश्चिमाः। अर्थः - अन्त्यम्

हृष्यत्यानन्दनिर्भरो योगी – हृष्यति आनन्दनिर्भरो योगी यण स्वरसन्धिः

हृष्यत्यानन्दनिर्भरो योगी – हृष्यत्यानन्दनिर्भरः योगी उकार विसर्गसन्धिः + गुण स्वरसन्धिः

हृष्यति - rejoices

हृष्यति – हृष् घातुः प्र एक

आनन्दनिर्भरो – bliss beyond measure

आनन्द (पुं) - स्यादानन्दथुरानन्दः शर्मशातसुखानि च। अर्थः – आनन्दः

निर्भर (नपुं) – अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरम्। अर्थः - अतिशयः

निर्भर (वि) - बलवत्सुष्ठु किमुत स्वत्यतीव च निर्भरे। अर्थः – अतिशयः

योगी – wise one, united with god

योगी – योगिन् नकारान्त शब्दः प्र ए

<u>समासाः</u>

आनन्दनिर्भरो

त्वमहमभिमानहीनो मोदितनानाजनाचारः । विहरति बालवदेको विमलसुखाम्भोनिधौ मग्नः ॥१४॥

अन्वय:

त्वमहमभिमानहीनो, मोदितनानाजनाचारः, विमलसुखाम्भोनिधौ मग्नः, बालवत्, एको विहरति

Devoid of “You” and “I” egoistic divisions, delighting in the variegated behaviours of men, immersed in the ocean of blemishless joy, the One roams like a child.

शब्दार्थ: विवरणं च

त्वम् अहम् अभिमानहीनो मोदित नानाजनाचारः

त्वम् अहम् – you & I (conceits, divisions)

अभिमानहीनो – devoid of conceits, divisions

अभिमान (पुं) - गर्वोऽभिमानोऽहङ्कारो मानश्चित्तसमुन्नतिः। नाट्यवर्गः। अर्थः - अहङ्कारः

अभिमान (पुं) - अभिमानोऽर्थादिदर्पे ज्ञाने प्रणयहिंसयोः। नानार्थवर्गः।अर्थः - अर्थादिदर्पाज्ञानम्, हिंसा, प्रणयम्

हीन (वि) - त्यक्तं हीनं विधुतं समुज्झितं धूतमुत्सृष्टे। विशेष्यनिघ्नवर्गः। अर्थः - उत्सृष्टम्

हीन (वि) - हीनन्यूनावूनगर्ह्यौ वेगिशूरौ तरस्विनौ। नानार्थवर्गः। अर्थः - ऊनः, गर्ह्यः

मोदित – gladdened, rejoiced in

मुद् (स्त्री) - मुत्प्रीतिः प्रमदो हर्षः प्रमोदामोदसम्मदाः। कालवर्गः। अर्थः - आनन्दः

नाना-जन-आचारः – variegated actions of people

नाना – अव्यय:

नाना (अव्य) - वृथा निरर्थकाविध्योर्नानानेकोभयार्थयोः। नानार्थवर्गः। अर्थः – अनेकम्, उभयार्थः

नाना (अव्य) - पृथग्विनान्तरेणर्ते हिरुङ्नाना च वर्जने। अव्ययवर्गः। अर्थः – वर्जनम्

विहरति बालवत् एको विमलसुखाम्भोनिधौ मग्नः

विहरति – roams, enjoys

विहरति – वि उपसर्ग, हृ धातु:

बालवदेको - बालवत् एको | जश्त्व व्यञ्जन सन्धि: | ८.२.३९ झलां जशोऽन्ते

बालवत् एको – one like a child,

बालवत् – अव्यय:

बाल (नपुं) - बालं ह्रीबेरबर्हिष्ठोदीच्यं केशाम्बुनाम च। वनौषधिवर्गः। अर्थः - ह्रीबेरम्

बाल (पुं) - बालस्तु स्यान्माणवको वयस्थस्तरुणो युवा। मनुष्यवर्गः। अर्थः - बालः

बाल (पुं) - चिकुरः कुन्तलो वालः कचः केशः शिरोरुहः। मनुष्यवर्गः। अर्थः - केशः

बाल (पुं) - बालः किशोरो वाम्यश्वा वडवा वाडवं गणे। क्षत्रियवर्गः। अर्थः - अश्वबालः

बाल (पुं) - मूर्खेऽर्भकेऽपि बालः स्याल्लोलश्चलसतृष्णयोः। नानार्थवर्गः। अर्थः – मूर्खः, शिशुः

एक (वि) - साधारणं तु सामान्यमेकाकी त्वेक एककः। विशेष्यनिघ्नवर्गः । अर्थः - असहायः

एक (वि) - भिन्नार्थका अन्यतर एकस्त्वोऽन्येतरावपि। विशेष्यनिघ्नवर्गः। अर्थः - भिन्नार्थकाः

एक (वि) - वृन्दारकौ रूपिमुख्यावेके मुख्यान्यकेवलाः। नानार्थवर्गः । अर्थः - अन्यः, केवलः, मुख्यः

विमलसुखाम्भोनिधौ - विमलसुखाम्भ: निधौ | उकार: विसर्ग सन्धि:

विमल-सुख-अम्भो-निधौ – unblemished-happiness-ocean (water-reservoir)

मल (पुं-नपुं) - तिलकं क्लोम मस्तिष्कं गोर्दं किट्टं मलोऽस्त्रियाम्। अर्थः - मलम्

मल (पुं-नपुं) - मलोऽस्त्री पापविट्किट्टान्यस्त्री शूलं रुगायुधम्। अर्थः – पापम्, पुराणकिट्टम्

सुख (नपुं) - स्यादानन्दथुरानन्दः शर्मशातसुखानि च। कालवर्गः। अर्थः – आनन्दः

अम्भस् (नपुं) - अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम्। वारिवर्गः। अर्थः - जलम्

मग्नः – immersed, engrossed

मग्न - मज्ज् धातु (मज्जति) क्त प्रत्यय

समासा:

अभिमानहीनः

नानाजनाचारः

विमलसुखाम्भः

अवधूतकर्मजालो जडबधिरान्धोपमः कोऽपि । आत्मारामो यतिराडटवीकोणेष्वटन्नास्ते ॥१५॥

अन्वय:

कोऽपि यतिराट् आत्मारामः, अवधूतकर्मजाल: जडबधिरान्धोपमः अटवी-कोणेषु अटन् आस्ते ॥१५॥

The One King of Ascetics, reveling in the Self, having discarded illusion of Karma, acting as if unintelligent, deaf and blind, roams in the corners of a forest.

शब्दार्थ: विवरणं च

अवधूतकर्मजालो जडबधिरान्धोपमः कोऽपि

अवधूत-कर्म-जालो जड-बधिर्-अन्ध-उपमः कोऽपि

अवधूत- discarding

धूत (वि) - त्यक्तं हीनं विधुतं समुज्झितं धूतमुत्सृष्टे। विशेष्यनिघ्नवर्गः । अर्थः – उत्सृष्टम्

कर्म – action-born tendencies

जालो – a net, collection, trick, fraud, poison

जाल (नपुं) - आनायः पुंसि जालं स्याच्छणसूत्रं पवित्रकम्। वारिवर्गः। अर्थः - जालम

जाल (नपुं) - जालं समूह आनायगवाक्षक्षारकेष्वपि। नानार्थवर्गः। अर्थः - समूहः, जालकम, नूतनकलिका

जड - unintelligent

जड (वि) - शीतं गुणे तद्वदर्थाः सुषीमः शिशिरो जडः। दिग्वर्गः। अर्थः - शीतलद्रव्यम्

जड (वि) - जडोऽज्ञ एडमूकस्तु वक्तुं श्रोतुमशिक्षिते। विशेष्यनिघ्नवर्गः। अर्थः - मूढमतिः

बधिर् – deaf one

बधिर (पुं) - स्यादेडे बधिरः कुब्जे गडुलः कुकरे कुणिः। मनुष्यवर्गः। अर्थः - श्रवणशक्तिहीनः

अन्ध: – blind one

अन्ध (वि) - किलासी सिध्मलोऽन्धोऽदृङ्मूर्च्छाले मूर्तमूर्च्छितौ। मनुष्यवर्गः। अर्थः - अचक्षुष्कः

अन्ध (पुं) - भिस्सा स्त्री भक्तमन्धोऽन्नमोदनोऽस्त्री सदीदिविः। वैश्यवर्गः। अर्थः - सिद्धान्नम्

अन्ध (नपुं) - मधु मद्ये पुष्परसे क्षौद्रेऽप्यन्धं तमस्यपि। नानार्थवर्गः। अर्थः – अन्धकारः

उपमः –similar to, highest

कोऽपि = क उ अपि = कः अपि   उकार विसर्ग सम्धिः + गुण स्वरसन्धिः

कोऽपि – someone

आत्मारामो यतिराडटवीकोणेष्वटन्नास्ते

आत्मारामो यतिराड्-अटवी-कोणेषु-अटन्-आस्ते

आत्मारामो – revelling in self

आत्मन् (पुं) - क्षेत्रज्ञ आत्मा पुरुषः प्रधानं प्रकृतिः स्त्रियाम्। अर्थः – आत्मा Soul

आत्मन् (पुं) - आत्मायत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च। अर्थः – ब्रह्मा, बुद्धिः

राम (पुं) - रेवतीरमणो रामः कामपालो हलायुधः। स्वर्गवर्गः। अर्थः - बलभद्रः

राम (पुं) - गन्धर्वः शरभो रामः सृमरो गवयः शशः। सिंहादिवर्गः। अर्थः - मृगभेदः

राम (विं) - नैगमौ द्वौ बले रामो नीलचारुसिते त्रिषु। नानार्थवर्गः। अर्थः - कृष्णवर्णः, मनोरमम्, शुक्लवर्णयुक्तः

यतिराडटवी – यतिराट् अटवी   जश्त्व व्यञ्जन सन्धि   ८.२.३९ झलां जशोऽन्ते

यतिराड् – prince of ascetics

यति (पुं) -ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते। ब्रह्मवर्गः । अर्थः - निर्जितेन्द्रिययतिः

अटवी – forest

अटवी (स्त्री) - अटव्यरण्यं विपिनं गहनं काननं वनम्। वनौषधिवर्गः। अर्थः - वनम्

कोणेष्वटन्नास्ते – कोणेष्वटन् आस्ते   ङमुटागम सन्धिः   ८.३.३२ ङमोः ह्रस्वादचि ङमुण् नित्यम्

कोणेष्वटन्नास्ते – कोणेषु अटन्नास्ते   यण स्वरसन्धि   ६.१.७७. इको यणचि

कोणेषु – in corners

कोण (पुं) - आनकः पटहोऽस्त्री स्यात्कोणो वीणादि वादनम्। नाट्यवर्गः। अर्थः - वीणादिवादनम्

कोण (पुं) - प्रासस्तु कुन्तः कोणस्तु स्त्रियः पाल्यश्रिकोटयः। क्षत्रियवर्गः। अर्थः – खड्गादिप्रान्तभागः

अटन् - roams

अटन्,अटन्ती   अट् धातु, शतृँ

आस्ते – exists

<u>समासा:</u>

अवधूतकर्मजालो

जडबधिरान्धोपमः

आत्मारामः

यतिराड्

अटवीकोणेषु

शान्त्या दृढोपगूढः शान्तसमस्तान्यवेदनोदारः । रमते रसज्ञ एको रम्ये स्वानन्दपर्यङ्के ॥१६॥

<u>अन्वय:</u>

एक: रसज्ञः शान्त्या दृढोपगूढः शान्तसमस्तान्यवेदन: उदारः स्वानन्दपर्यङ्के रम्ये रमते

One who knows the Essence, is well concealed by his peacefulness, subdues all other learning, is generous, and revels in the pleasant bed of Bliss-in-Oneself.

<u>शब्दार्थ: विवरणं च</u>

शान्त्या दृढोपगूढः शान्तसमस्तान्यवेदनोदारः

शान्त्या दृढ-उपगूढः शान्त-समस्त-अन्य-वेदन-उदारः

शान्त्या – through peace

शान्ति (स्त्री) - शमथस्तु शमः शान्तिर्दान्तिस्तु दमथो दमः। अर्थः – कामक्रोधाद्यभावः

दृढोपगूढः – दृढ उपगूढः स्वरसन्धि: - गुण

दृढ उपगूढः – दृढ: उपगूढः विसर्ग सन्धि: - लोप:

दृढ-उपगूढः- strongly hidden

दृढ (वि) - खक्खटं कठिनं क्रूरं कठोरं निष्ठुरं दृढम्। अर्थः - कठिनम्

दृढ (वि) - शक्तस्थूलौ त्रिषु दृढौ व्यूढौ विन्यस्तसंहतौ। अर्थः – शक्तः, स्थूलम्

दृढ (नपुं) - तीव्रैकान्तनितान्तानि गाढबाढदृढानि च। अर्थः - अतिशयः

गूढ (वि) - निदिग्धोपचिते गूढगुप्ते गुण्ठितरूषिते। अर्थः – कृतगोपनः

शान्तसमस्तान्यवेदनोदारः – शान्तसमस्त अन्यवेदनोदारः सवर्णदीर्घ स्वरसन्धि: ।

अन्यवेदनोदारः – अन्यवेदन उदारः स्वरसन्धि: - गुण

शान्त - quietened

शान्त (वि) - दान्तस्तु दमिते शान्तः शमिते प्रार्थितेऽर्दित। विशेष्यनिघ्नवर्गः। अर्थः - शमनं प्रापितः

समस्त-अन्य – all other

समस्त (वि) - विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम्। विशेष्यनिघ्नवर्गः। अर्थः – समग्रम्

अन्य (वि) - भिन्नार्थका अन्यतर एकस्त्वोऽन्येतरावपि। विशेष्यनिघ्नवर्गः। अर्थः - भिन्नार्थकाः

वेदन – knowledge, learning

उदारः – generous

उदार (वि) - दक्षिणे सरलोदारौ सुकलो दातृभोक्तरि। अर्थः – उदारमनः

उदार (वि) - उदारो दातृमहतोरितरस्त्वन्यनीचयोः। अर्थः – धाता

रमते रसज्ञ एको रम्ये स्वानन्दपर्यङ्के

रमते रसज्ञ एको रम्ये स्वानन्द-पर्यङ्के

रमते - enjoys

रसज्ञ एको रम्ये - रसज्ञ एक: रम्ये विसर्ग सन्धि: - उकार:

रसज्ञ एको – रसज्ञ: एको विसर्ग सन्धि: - लोप:

रसज्ञ –who knows the bliss/essence

रस (पुं) - रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी। अर्थः - रसनेन्द्रियविषयः

रस (पुं) - क्षारः काचोऽथ चपलो रसः सूतश्च पारदे। अर्थः - पारदः

रस (पुं) - वोलगन्धरसप्राणपिण्डगोपरसाः समाः। अर्थः - गन्धरसः

रस (पुं) - शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः। अर्थः – गुणः, रागः, शृङ्गारादिः, विषम्, वीर्यम्, द्रवः
ज्ञ (पुं) - धीरो मनीषी ज्ञः प्राज्ञः संख्यावान्पण्डितः कविः। ब्रह्मवर्गः। अर्थः – विद्वान्

एको - one

एक (वि) - साधारणं तु सामान्यमेकाकी त्वेक एककः। विशेष्यनिघ्नवर्गः । अर्थः - असहायः
एक (वि) - भिन्नार्थका अन्यतर एकस्त्वोऽन्येतरावपि। विशेष्यनिघ्नवर्गः। अर्थः - भिन्नार्थकाः
एक (वि) - वृन्दारकौ रूपिमुख्यावेके मुख्यान्यकेवलाः। नानार्थवर्गः । अर्थः - अन्यः, केवलः, मुख्यः

रम्ये – in the pleasantness

रम्ये - रम्य प्रातिपदिकं, सप्तमी एक

स्वानन्द-पर्यङ्के – in the bed of one’s own bliss

स्वानन्द – स्व आनन्द सवर्णदीर्घ स्वरसन्धिः ।

स्व (पुं) - स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने। अर्थः – आत्मा, धनम्, आत्मीयम्
स्व (पुं) - सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः। अर्थः - सगोत्रः
आनन्द (पुं) - स्यादानन्दथुरानन्दः शर्मशातसुखानि च। अर्थः – आनन्दः
पर्यङ्क (पुं). शयनं मञ्चपर्यङ्कपल्यङ्काः खट्वया समाः. मनुष्यवर्गः. अर्थः – पर्यङ्कः

<u>समासा:</u>

शान्तसमस्तान्यवेदनोदारः
रसज्ञः
स्वानन्दपर्यङ्के
स्वानन्द

उन्मूलितविषयारिः स्वीकृतवैराग्यसर्वस्वः । स्वात्मानन्दमहिम्नि स्वाराज्येऽस्मिन् विराजते यतिराट् ॥१७॥

<u>अन्वय:</u>

उन्मूलित-विषय-अरिः, स्वीकृत-वैराग्य-सर्वस्वः, यतिराट् स्व-आत्मानन्द-महिम्नि स्वाराज्ये-अस्मिन् विराजते

Having uprooted sense-objects that are enemies, having embraced renunciation of all belongings, the king of ascetics shines in the kingdom within, the great bliss of one’s own Self.

<u>शब्दार्थ: विवरणं च</u>

उन्मूलितविषयारिः स्वीकृतवैराग्यसर्वस्वः
उन्मूलित-विषय-अरिः स्वीकृत-वैराग्य-सर्वस्वः

उन्मूलित – eradicated, plucked, pulled up by the root

विषय – material objects

विषय (पुं) - रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी। अर्थः - विषयाः
विषय (पुं) - नीवृज्जनपदो देशविषयौ तूपवर्तनम्। अर्थः - ग्रामसमुदायलक्षणस्थानम्

विषय (पुं) - उत्कर्षोऽतिशये सन्धिः श्लेषे विषय आश्रये। अर्थः - आश्रयः

विषय (पुं) - विषयो यस्य यो ज्ञातस्तत्र शब्दादिकेष्वपि। अर्थः – शब्दादीन्द्रियम्, यस्य यत् ज्ञातः तत्

अरिः –enemies

अरि (पुं) - रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः । अर्थः - शत्रुः

स्वीकृत – accepted, agred, assented

स्व, कृत made, च्वि augment.

स्वी in compound for स्व च्वि —tad. affix (of which nothing remains) to signify the taking place of something which was not so before; after the word ending in च्वि (*cvi*) the forms of the root कृ, भू (*kṛ*, *bhū*) or असू (*asū*) have to be placed; e. g. शुक्ली-करोति

कृतः, कृता - क्त

स्वीकर (पुं) – अङ्गीकाराभ्युपगमप्रतिश्रवसमाधयः। धीवर्गः। अर्थः – अङ्गीकारः

वैराग्य – absense of desire

वैराग्यम् - विरागस्य भावः – विराग + ष्यञ्

सर्वस्वः – all possessions, all wealth

सर्व (पुं) - ईश्वरः शर्व ईशानः शङ्करश्चन्द्रशेखरः। स्वर्गवर्गः। अर्थः - शिवः

सर्व (वि) - गणनीये तु गणेयं संख्याते गणितमथ समं सर्वम्। विशेष्यनिघ्नवर्गः। अर्थः – समग्रम्

स्व (पुं) - सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः। मनुष्यवर्गः। अर्थः - सगोत्रः

स्व (पुं) - स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने। नानार्थवर्गः। अर्थः - आत्मा, धनम्, आत्मीयम्

स्वात्मानन्दमहिम्नि स्वाराज्येऽस्मिन् विराजते यतिराट्

स्व-आत्मानन्द-महिम्नि स्वाराज्ये-अस्मिन् विराजते यतिराट्

स्व-आत्मानन्द-महिम्नि – in the great bliss of one's own self

स्व (पुं) - सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः। मनुष्यवर्गः। अर्थः - सगोत्रः

स्व (पुं) - स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने। नानार्थवर्गः। अर्थः - आत्मा, धनम्, आत्मीयम्

आत्मन् (पुं) - क्षेत्रज्ञ आत्मा पुरुषः प्रधानं प्रकृतिः स्त्रियाम्। अर्थः – आत्मा Soul

आत्मन् (पुं) - आत्मायत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च। अर्थः – ब्रह्मा, बुद्धिः

आनन्द (पुं) - स्यादानन्दथुरानन्दः शर्मशातसुखानि च। अर्थः – आनन्दः

महिम्नि - महिमन् शब्दः [पुमान्], सप्तमी एक (also महिमनि)

महिमन् (पुं) - अणिमा महिमा चैव गरिमा लघिमा तथा। स्वर्गवर्गः। अर्थः - सिद्धिः

स्वाराज्येऽस्मिन् – स्वाराज्ये अस्मिन् अच् पूर्वरूपसन्धिः

स्वाराज्ये – within own kingdom

अस्मिन् – within this

विराजते – appears beautiful, shines

यतिराट् – king of ascetics

यति (पुं) ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते । अर्थः – निर्जितेन्द्रिययतिः

राट् – राज् शब्दः [पुमान्], प्र एक

<u>समासा:</u>

उन्मूलितविषयारिः
स्वीकृतवैराग्यसर्वस्वः
स्वात्मानन्दमहिम्नि
सर्वस्वः
स्वाराज्ये
यतिराट्

सवितर्यपि शीतरुचौ चन्द्रे तीक्ष्णेऽप्यधो वहत्यग्नौ । मायिकमिदमिति जानन् जीवन्मुक्तो न विस्मयी भवति ॥१८॥

<u>अन्वय:</u>
सवितर्यपि शीतरुचौ, चन्द्रे तीक्ष्णेऽपि, अधो वहत्यग्नौ, मायिकमिदमिति जानन् जीवन्मुक्तो न विस्मयी भवति

Even if cold splendour is in the sun, even if sharp heat is in the moon, even if fire flows downward, the living, realized master is not surprised, knowing all of this to be illusory.

<u>शब्दार्थ: विवरणं च</u>
सवितर्यपि शीतरुचौ चन्द्रे तीक्ष्णेऽप्यधो वहत्यग्नौ
सवितु: अपि शीतरुचौ चन्द्रे तीक्ष्णे अपि अधो वहति अग्नौ
सवितर्यपि - सवितरि अपि
सवितरि अपि – also, in the sun
सवितरि - सवितृ शब्द: ऋकारान्त, पुँ, सप्तमी ए
सवितृ (पुं) - भानुर्हंसः सहस्रांशुस्तपनः सविता रविः। अर्थः – सूर्यः
अपि (अव्य) – गर्हासमुच्चयप्रश्नशङ्कासम्भावनास्वपि। नानार्थवर्गः। अर्थः - गर्हा, प्रश्नः, शङ्का, सम्भावना, समुच्चयः
शीतरुचौ – cold light
शीत (नपुं) - शीतं गुणे तद्वदर्थाः सुषीमः शिशिरो जडः। अर्थः – शैत्यम्
रुचौ – रुच् शब्द:, स्त्री ; प्रथमा - रुक् रुचौ रुच: ; द्वि - रुचम् रुचौ रुच: ...
रुचि (स्त्री) - स्युः प्रभारुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तयः। दिग्वर्गः। अर्थः - प्रभा
रुचि (स्त्री) - अभिष्वङ्गे स्पृहायां च गभस्तौ च रुचिः स्त्रियाम्। नानार्थवर्गः। अर्थः - अत्यासक्तिः, किरणः, स्पृहा
तीक्ष्णेऽप्यधो वहत्यग्नौ - तीक्ष्णेऽप्यध: वहत्यग्नौ   उकार: विसर्ग सन्धि: + गुण स्वरसन्धि:
तीक्ष्णेऽप्यधो - तीक्ष्णे अप्यधो   पूर्वरूप स्वरसन्धि:
अप्यधो – अपि अधो   यण् स्वरसन्धि:
चन्द्रे तीक्ष्णे अपि – also sharp heat in moon
चन्द्रे तीक्ष्णे – सति सप्तमी ?
चन्द्र (पुं) - हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः। दिग्वर्गः। अर्थः - चन्द्रः
चन्द्र (पुं) - काम्पिल्यः कर्कशश्चन्द्रो रक्ताङ्गो रोचनीत्यपि। वनौषधिवर्गः। अर्थः - रोचनी
चन्द्र (पुं) - स्वर्णेऽपि भूरिचन्द्रौ द्वौ द्वारमात्रेऽपि गोपुरम्। नानार्थवर्गः । अर्थः - सुवर्णम्

तीक्ष्ण (नपुं) - तिग्मं तीक्ष्णं खरं तद्वन्मृगतृष्णा मरीचिका। अर्थः – अत्युष्णम्

वहत्यग्नौ - वहति अग्नौ यण् स्वरसन्धिः

अधो वहति अग्नौ – fire carries away down

अग्नि (पुं) - अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनञ्जयः। अर्थः - अग्निः

मायिकमिदमिति जानन् जीवन्मुक्तो न विस्मयी भवति

मायिकम् इदम् इति जानन् जीवन्मुक्तो न विस्मयी भवति

मायिकम् इदम् इति – that this is illusory

मायिकम् - created by maya?

माया (स्त्री) - स्यान्माया शाम्बरी मायाकारस्तु प्रतिहारकः। शूद्रवर्गः। अर्थः - इन्द्रजालादिमाया

जानन् - knowing

जानन् – ज्ञा धातु:, शतृ प्रत्यय:

जीवन्मुक्तो – living but free (sage)

जीवन् – जीव् धातु:, शतृ प्रत्यय

जीव (पुं) - जीव आङ्गिरसो वाचस्पतिश्चित्रशिखण्डिजः। दिग्वर्गः। अर्थः - बृहस्पतिः

जीव (पुं) - पूंसि भूम्न्यसवः प्राणाश्चैवं जीवोऽसुधारणम्। क्षत्रियवर्गः। अर्थः - जीवनम्

मुक्ति (स्त्री) - मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम्। धीवर्गः। अर्थः – मोक्षः

न विस्मयी भवति – is not surprised (deluded)

विस्मय (पुं) - विस्मयोऽद्भुतमाश्चर्यं चित्रमप्यथ भैरवम्। अर्थः – अद्भुतरसः

समासा:

शीतरुचौ

जीवन्मुक्तो

अज्ञानवैरिविजयी प्रज्ञामातङ्गमस्तकारूढः विहरति संयमिराजः समरससुखधाम्नि सर्वतो रम्ये ॥११॥

अन्वय:

अज्ञानवैरिविजयी प्रज्ञामातङ्गमस्तकारूढः संयमिराजः समरससुखधाम्नि विहरति सर्वतो रम्ये ॥११॥

Victorious over the enemy of ignorance, having climbed atop the forehead of the elephant of knowledge, king of restraint, in an abode of equanimous pleasure, he roams always in enjoyment

शब्दार्थ: विवरणं च

अज्ञानवैरिविजयी प्रज्ञामातङ्गमस्तकारूढः

अज्ञान-वैरि-विजयी प्रज्ञा-मातङ्ग-मस्तक-आरूढः

अज्ञान-वैरि-विजयी having conquered the enemy of ignorance

अज्ञान- ignorance

अज्ञ (वि) - जडोऽज्ञ एडमूकस्तु वक्तुं श्रोतुमशिक्षिते। विशेष्यनिघ्नवर्गः। अर्थः - मूढमतिः

अज्ञ (वि) - अज्ञे मूढयथाजातमूर्खवैधेयबालिशाः – विशेष्यनिघ्नवर्गः। अर्थः – मूर्खः

वैरि- the enemy

वैरिन् (पुं) - रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः। अर्थः – शत्रुः

विजयी having conquered, victor

विजयिन् [पुमान्] ; प्रथमा - विजयी विजयिनौ विजयिनः

विजय (पुं) - अभ्यवस्कन्दनं त्वभ्यासादनं विजयो जयः। क्षत्रियवर्गः। अर्थः - विजयः

प्रज्ञा-मातङ्ग-मस्तक-आरूढः – sitting atop the head of the elephant of knowledge

प्रज्ञा- right knowledge (of oneself)

प्रज्ञा [स्त्रीः] ; प्रथमा - प्रज्ञा प्रज्ञे प्रज्ञाः

प्रज्ञा (स्त्री) - बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः। अर्थः – बुद्धिः

प्रज्ञा (स्त्री) - वृद्धा पलिक्नी प्राज्ञी तु प्रज्ञा प्राज्ञा तु धीमती। अर्थः – स्वयम्ज्ञात्री

मातङ्ग- elephant (outcast per Amara)

मातङ्ग (पुं) – चण्डालप्लवमातङ्गदिवाकीर्तिजनङ्गमाः। अर्थः – चण्डालः

मस्तक- head

मस्तक (पुं-नपुं) - उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम्। अर्थः – शिरः

आरूढः – sitting atop, having climbed

आरूढः - आङ् + रुह् + कर्तरि क्त

विहरति संयमिराजः समरससुखधाम्नि सर्वतो रम्ये

विहरति संयमि-राजः समरस-सुख-धाम्नि सर्वतो रम्ये

विहरति – enjoys, roams

संयमि-राजः – king of those who have restrained their senses (ascetics)

संयम (पुं) - वियामो वियमो यामो यमः संयामसंयमौ । अर्थः - संयमः

समरस-सुख-धाम्नि – in abode of equanimity-pleasure

धामन् - [नपुंसकम्] ; प्रथमा – धाम धाम्नी/धामनी धामानि

धामन् (नपुं) - गृहदेहत्विट्प्रभावा धामान्यथ चतुष्पथे। अर्थः – गृहम्, किरणः, प्रभावः, देहः

सर्वतो रम्ये – सर्वतः रम्ये उकारः विसर्ग सन्धिः + गुण स्वरसन्धिः

सर्वतो – everywhere, around, all sides

सर्वतस् (अव्य) - समन्ततस्तु परितः सर्वतो विष्वगित्यपि। अर्थः – सर्वत्र

रम्ये – enjoys

रम् धातूः भावकर्मणोः लट्लकारः (आत्मनेपदम्); प्रथम पुरुष – रम्यते रम्येते रम्यन्ते

<u>समासाः</u>

अज्ञानवैरिविजयी

प्रज्ञामातङ्गमस्तकारूढः

संयमिराजः

समरससुखधाम्नि

शान्ताहंकृतिदोषः सुसमाहितमानसः कोऽपि । पूर्णेन्दुशिशिरभावो राजत्यानन्दसत्यचिद्रसिकः ॥२०॥

<u>अन्वय:</u>

कोऽपि शान्ताहंकृतिदोषः सुसमाहितमानसः पूर्णेन्दुशिशिरभाव: आनन्दसत्यचिद्रसिकः राजति

The One shines, who has calmed his Ego-defect (“I do”), has an integrated mind, is cool in nature like the full moon, is the enjoyer of the Bliss-Existence-Consciousness.

<u>शब्दार्थ: विवरणं च</u>

शान्ताहंकृतिदोषः सुसमाहितमानसः कोऽपि

शान्त-अहंकृति-दोषः सुसमाहित-मानसः क: अपि

शान्त-अहंकृति-दोषः – quietened ego defect

शान्ताहंकृतिदोषः – शान्त अहंकृतिदोषः सवर्णदीर्घ स्वरसन्धिः

शान्त- quietened

शान्त (वि) - दान्तस्तु दमिते शान्तः शमिते प्रार्थितेऽर्दितः। अर्थः - शमनं प्रापितः

अहं-कृति – I am performing, doing

कृति – कृतिन्, नपुँ प्र/द्वि एक

कृ + क्तिन् = कृतिः

कृतिन् (पुं) - धीमान्सूरिः कृती कृष्टिर्लब्धवर्णो विचक्षणः। ब्रह्मवर्गः। अर्थः - विद्वान्

कृतिन् (वि) - वैज्ञानिकः कृतमुखः कृती कुशल इत्यपि। विशेष्यनिघ्नवर्गः। अर्थः – कुशलः

दोषः – defect, fault, blemish

सुसमाहित-मानसः -well understood/integrated spiritual mind

समाहित (वि) – सङ्गीर्णविदितसंश्रुतसमाहितोपश्रुतोपगतम् - अर्थः – अङ्गीकृतम्

मानस (नपुं) - चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः। अर्थः – मनस्

कोऽपि = क उ अपि = क: अपि उकार विसर्ग सम्धि: + गुण स्वरसन्धिः

क: अपि – anyone who is thus

पूर्णेन्दुशिशिरभावो राजत्यानन्दसत्यचिद्रसिकः

पूर्ण-इन्दु शिशिर-भावो राजति-आनन्द-सत्य-चिद्-रसिकः

पूर्ण-इन्दु शिशिर-भावो – cool natured like the full moon

पूर्णेन्दुशिशिरभाव: - पूर्ण इन्दुशिशिरभाव: गुण स्वरसन्धि

पूर्ण-इन्दु – full moon

पूर्ण (वि) - पूर्णस्तु पूरिते क्लिष्टः क्लिशितेऽवसिते सितः। अर्थः – पूर्णः

इन्दु (पुं) - हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः। अर्थः – चन्द्रः

शिशिर-भावो – cool characteristic

शिशिर (वि)- शीतं गुणे तद्वदर्थाः सुषीमः शिशिरो जडः। अर्थः - शीतलद्रव्यम्

शिशिर (पुं-नपुं) - बाहुलोर्जौ कार्तिकिको हेमन्तः शिशिरोऽस्त्रियाम्। अर्थः - माघफाल्गुनाभ्यां निष्पन्नः ऋतुः

भाव (पुं) - भगिनीपतिरावुत्तो भावो विद्वानथावुकः। नाट्यवर्गः। अर्थः - विद्वान्

भाव (पुं) - भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु। नानार्थवर्गः। अर्थः - सत्ता, स्वभावः, अभिप्रायः, चेष्टा, आत्मा, जननम्

राजति-आनन्द-सत्य-चिद्-रसिकः

राजति – reigns

राजति – राज् धातुः, भ्वादिः उभयपदी अकर्मकः

आनन्द-सत्य-चिद् – bliss, existence, knowledge

आनन्द (पुं) - स्यादानन्दथुरानन्दः शर्मशातसुखानि च। अर्थः – आनन्दः

सत्य (वि) - सत्यं तथ्यमृतं सम्यगमूनि त्रिषु तद्वति। अर्थः – सत्यवचनम्

सत्य (वि) - रहस्योपस्थयोर्गुह्यं सत्यं शपथतथ्ययोः। अर्थः – शपथः, तथ्यम्

चित् (स्त्री) – प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतना। अर्थः – बुद्धिः

रसिकः – fond of, enjoyer

<u>समासा:</u>

शान्ताहंकृतिदोषः

सुसमाहितमानसः

पूर्णेन्दुशिशिरभावः

आनन्दसत्यचिद्रसिकः

तिष्ठन्परत्र धाम्नि स्वीयसुखास्वादपरवशः कश्चित् । क्वापि ध्यायति कुहचिद्गायति कुत्रापि नृत्यति स्वैरम् ॥२१॥

<u>अन्वय:</u>

कश्चित् स्वीयसुखास्वादपरवशः परत्र धाम्नि तिष्ठन् स्वैरम् क्वापि ध्यायति कुहचिद्गायति कुत्रापि नृत्यति ॥२१॥

One, tasting the Bliss within oneself, not under the influence of others, staying in some other abode (out of this world), of his own free will meditates somewhere, barks (sings) wherever, dances anywhere.

<u>शब्दार्थ: विवरणं च</u>

तिष्ठन्परत्र धाम्नि स्वीयसुखास्वादपरवशः कश्चित्

तिष्ठन् परत्र धाम्नि स्वीय-सुख-आस्वाद्-अपरवशः कश्चित्

तिष्ठन् - standing

तिष्ठन् – स्था धातु शतृ प्रत्यय

परत्र – in another place, another world

धाम्नि – in a residence

धाम्नि धामन् शब्दः नपुँ ; प्रथमा - धाम धाम्नी/धामनी धामानि

धामन् (नपुं) गृहदेहत्विट्प्रभावा धामान्यथ चतुष्पथे। अर्थः – गृहम्, किरणः, प्रभावः, देहः

स्वीय-सुख-आस्वाद्-अपरवशः – one who relishes in one's own happiness, not subservient to others

स्वीय- belonging to oneself

स्वीयः, त्रि, (स्वस्यायमिति । स्व + छः ।) स्वकीयः ।आत्मीयः

सुख- happiness

सुख (नपुं) - स्यादानन्दथुरानन्दः शर्मशातसुखानि च। कालवर्गः। अर्थः - आनन्दः

आस्वाद्- taste, eat with relish

अपरवशः – not subservient to others

पर (नपुं) - पारावारे परार्वाची तीरे पात्रं तदन्तरम्। वारिवर्गः। अर्थः - परतीरम्

पर (पुं) – अभिघातिपरारातिप्रत्यर्थिपरिपन्थिनः। क्षत्रियवर्गः। अर्थः - शत्रुः

पर (पुं) - एषां विपर्यये श्रेष्ठे दूरानात्मोत्तमाः पराः। नानार्थवर्गः। अर्थः - अन्यः, उत्तमः, दूरम्

वश (पुं) - ग्रहे ग्राहो वशः कान्तौ रक्षणस्त्राणे रणः क्वणे। सङ्कीर्णवर्गः। अर्थः – इच्छा

कश्चित् – someone

क्वापि ध्यायति कुहचिद्रायति कुत्रापि नृत्यति स्वैरम्

क्वापि ध्यायति कुहचिद्-रायति कुत्र-अपि नृत्यति स्वैरम्

क्वापि – somewhere, in a certain place

क्वापि – अव्यय

ध्यायति – meditates on

कुहचिद्-रायति -

कुहचिद्- wherever

रायति – barks (sings)

रायति – रै धातु

कुत्रापि – कुत्र अपि - सवर्णदीर्घ स्वरसन्धिः ।

कुत्र-अपि - anywhere at all

नृत्यति – dances

स्वैरम् – voluntarily, unreservedly

स्वैर (वि) - मन्दस्वच्छन्दयोः स्वैरः शुभ्रमुद्दीप्तशुक्लयोः। नानार्थवर्गः। अर्थः - अलसः, स्वच्छन्दः

<u>समासा:</u>

स्वीयसुखास्वादपरवशः

अगृहीताघकलङ्कः प्रशमितसङ्कल्पविभ्रमः प्राज्ञः । न्यक्कृतकार्यकलापस्तिष्ठत्यापूर्णसीमनि क्वापि ॥२२॥

<u>अन्वय:</u>

अगृहीताघकलङ्कः प्रशमितसङ्कल्पविभ्रमः न्यक्कृतकार्यकलाप: प्राज्ञः आपूर्णसीमनि क्वापि तिष्ठति॥२२॥

Having relinquished lower qualities, having calmed the delusion of mental activity, having derided the collection of works, the Wise One stands somewhere, in the boundaries of fullness (secure in fullness)

शब्दार्थ: विवरणं च

अगृहीताघकलङ्कः प्रशमितसङ्कल्पविभ्रमः प्राज्ञः ।

अगृहीत-अघ-कलङ्कः प्रशमित-सङ्कल्प-विभ्रमः प्राज्ञः

अगृहीत-अघ-कलङ्कः – low sins untouched

गृहीतः, गृहीता – ग्रह् धातु: क्त प्रत्यय

अगृहीत- not grasped

अघ- below, under

अध: - अव्यय

कलङ्कः – blot or stain, or denial

कलङ्क (पुं) - कलङ्काङ्कौ लाञ्छनं च चिह्नं लक्ष्म च लक्षणम्। अर्थः – चिह्नम्

कलङ्क (पुं) - उत्सङ्गचिह्नयोरङ्कः कलङ्कोऽङ्कापवादयोः। अर्थः – अपवादः

प्रशमित-सङ्कल्प-विभ्रमः -ideas and disturbances quelled

प्रशमित- quelled, pacified, conquered

सङ्कल्प- volition, will, idea, purpose

सङ्कल्प (पुं) - धीर्धारणावती मेधा सङ्कल्पः कर्म मानसम्। अर्थः – मनोव्यापारकर्मः

विभ्रमः – error, doubt, disturbance

विभ्रम (पुं) - उष्णोऽपि घर्मचेष्टालङ्कारे भ्रान्तौ च विभ्रमः। अर्थः – अतस्मित्तज्ज्ञानम्

प्राज्ञः – wise person

प्राज्ञ (पुं) - धीरो मनीषी ज्ञः प्राज्ञः संख्यावान्पण्डितः कविः। अर्थः – विद्वान्

न्यक्कृत-कार्यकलापस्-तिष्ठति-आपूर्ण-सीमनि क्वापि

न्यक्कृत-कार्यकलापस्-तिष्ठति-आपूर्ण-सीमनि – treating works with contempt, full to boundaries, stands

न्यक्कृत- humbled, treated with contempt

कार्यकलापस्- collection of work

कलाप (पुं) - कलापो भूषणे बर्हे तूणीरे संहतावपि

तिष्ठति- stands

आपूर्ण- full

पूर्ण (वि) - पूर्णस्तु पूरिते क्लिष्टः क्लिशितेऽवसिते सितः। अर्थः – पूर्णः

सीमनि – to boundaries

सीमन् नकारान्तः स्त्रीलिङ्गः ; प्रथमा – सीमा सीमानौ सीमानः

सीमन् (स्त्री) - ग्रामान्तमुपशल्यं स्यात्सीमसीमे स्त्रियामुभे। अर्थः – सीमा

क्वापि – somewhere

क्वापि - अव्यय

कु (स्त्री) - गोत्रा कुः पृथिवी पृथ्वी क्ष्मावनिर्मेदिनी मही। अर्थः – भूमिः

<u>समासा:</u>
अगृहीताघकलङ्कः
प्रशमितसङ्कल्पविभ्रमः
न्यक्कृतकार्यकलाप:
आपूर्णसीमनि

चपलं मनःकुरङ्गं चारु गृहीत्वा विमर्शवागुरया । निगमारण्यविहारश्रान्तः शेते स्वधाम्नि कोऽप्येकः ॥२३॥

<u>अन्वय:</u>
कोऽप्येकः चपलं मनःकुरङ्गं चारु विमर्शवागुरया गृहीत्वा, निगमारण्यविहारश्रान्तः, स्वधाम्नि शेते ॥२३॥

Some One, having grasped the fickle mind that is like a pretty antelope in a noose of enquiry, fatigued from wandering in the forest of Vedas, rests in the abode of his own Self.

<u>शब्दार्थ: विवरणं च</u>
चपलं मनःकुरङ्गं चारु गृहीत्वा विमर्शवागुरया ।
चपलं मनः-कुरङ्गं चारु गृहीत्वा विमर्श-वागुरया ।

चपलं – inconstant, unsteady

चपल (नपुं) - सत्वरं चपलं तूर्णमविलम्बितमाशु च। अर्थः – शीघ्रम्

चपल (पुं) - क्षारः काचोऽथ चपलो रसः सूतश्च पारदे। अर्थः – पारदः (mercury)

चपल (वि) - शिश्विदानोऽकृष्णकर्मा चपलश्चिकुरः समौ। अर्थः - दोषमनिश्चित्य वधादिकमाचरः

मनः-कुरङ्गं mind that is like a deer/antelope

चारु – elegant, pretty

चारु (वि) - सुन्दरं रुचिरं चारु सुषमं साधु शोभनम्। अर्थः – मनोरमम्

गृहीत्वा – holding, grasping, taking

गृहीत्वा – ग्रह् धातु: क्त्वा प्रत्यय

विमर्श – consideration, examination

विमर्श (पुं) - विमर्शो भावना चैव वासना च निगद्यते। अर्थः – वासना

वागुरया – noose, trap

वागुरा – आकारान्त स्त्री, वागुरया – तृतीया एक

वागुरा (स्त्री) - उन्माथः कूटयन्त्रं स्याद्वागुरा मृगबन्धनी। अर्थः – जालविशेषः

निगमारण्यविहारश्रान्तः शेते स्वधाम्नि कोऽप्येकः
निगम-अरण्य-विहार-श्रान्तः शेते स्वधाम्नि को-अपि-एक:

निगम-अरण्य-विहार-श्रान्तः fatigued from the trip in the forest of the Veda

निगम- vedas

निगम (पुं) - स्थानीयं निगमोऽन्यत्तु यन्मूलनगरात्पुरम्। अर्थः – नगरम्

आरण्य- forest

अरण्य (नपुं) - अटव्यरण्यं विपिनं गहनं काननं वनम्। अर्थः – वनम्

विहार- pleasure trip, pastime

विहार (पुं) - प्रत्याहार उपादानं विहारस्तु परिक्रमः. अर्थः – क्रीडार्थसञ्चरणम्

श्रान्तः - fatigued

शेते – lies down

स्वधाम्नि – in own house

धाम्नि धामन् शब्दः नपुँ, सप्तमी एक

धामन् (नपुं) - गृहदेहत्विट्प्रभावा धामान्यथ चतुष्पथे। अर्थः – गृहम्, अर्थः – किरणः, अर्थः – प्रभावः, अर्थः – देहः

कोऽप्येकः को-अपि-एकः - whoever, one

समासा:

मनःकुरङ्गं

विमर्शवागुरया

निगमारण्यविहारश्रान्तः

स्वधाम्नि

दारुणचित्तव्याघ्रं धीरमनःखड्गधारया हत्वा । अभयारण्ये कोऽपि स्वैरविहारी जयत्येकः ॥२४॥

अन्वय:

कोऽपि एकः दारुणचित्तव्याघ्रं धीरमनःखड्गधारया हत्वा अभयारण्ये स्वैरविहारी जयति ॥२४॥

Some One Unique, having slain the fearsome tiger of mind and thought, using his firm mind for a sword’s edge, becomes a victorious and free wanderer in the forest of fearlessness.

शब्दार्थ: विवरणं च

दारुणचित्तव्याघ्रं धीरमनःखड्गधारया हत्वा ।

दारुण-चित्त-व्याघ्रं धीरमनः-खड्ग-धारया हत्वा

दारुण-चित्त-व्याघ्रं – this dreadful mind that is a tiger

दारुण – horror, severity, frightful, dreadful

दारुण (वि) - दारुणं भीषणं भीष्मं घोरं भीमं भयानकम्। अर्थः – भयानकरसः

चित्त- mind, thought

चित्त (नपुं) - चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः। अर्थः - मनस्

व्याघ्रं - तिगेर

व्याघ्र (पुं) - शार्दूलद्वीपिनौ व्याघ्रे तरक्षुस्तु मृगादनः। अर्थः – व्याघ्रः

धीरमनः-खड्ग-धारया हत्वा – having killed using the firm mind, as the edge of a sword

धीरमनः – brave, firm mind

धीर (पुं) - धीरो मनीषी ज्ञः प्राज्ञः संख्यावान्पण्डितः कविः। अर्थः – विद्वान्

मनस् (नपुं) - चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः। अर्थः – मनस्

खड्ग- sword, sacrificial knife

खड्ग (पुं) - तूण्यां खड्गे तु निस्त्रिंशचन्द्रहासासिरिष्टयः। अर्थः - खड्गः

धारया - using the edge

धारा (स्त्री) - गतयोऽमूः पञ्च धारा घोणा तु प्रोथमस्त्रियाम्। अर्थः - आस्कन्दितादि पञ्चगतयः

हत्वा – having been killed

अभयारण्ये कोऽपि स्वैरविहारी जयत्येकः ॥२४॥

अभय-अरण्ये कोऽपि स्वैरविहारी जयति-एकः

अभय-अरण्ये – in forest of fearlessness

अभय (नपुं) - अभयं नलदं सेव्यममृणालं जलाशयम्। अर्थः - वीरणमूलम्

अरण्य (नपुं) - अटव्यरण्यं विपिनं गहनं काननं वनम्। अर्थः - वनम्

कोऽपि = क उ अपि = क: अपि	उकार विसर्ग सम्धि: + गुण स्वरसन्धि:

कोऽपि एकः - someone

स्वैर – of own free will

स्वैर (वि) - मन्दस्वच्छन्दयोः स्वैरः शुभ्रमुद्दीप्तशुक्लयोः। अर्थः – अलसः, स्वच्छन्दः

विहारी - wanderer

विहारिन् [पुमान्]; सम्बोधनम् - विहारिन्	विहारिणौ	विहारिणः
विहारिन् [नपुंसकम्]म ; प्रथमा - विहारि	विहारिणी	विहारीणि

जयत्येकः – जयति एक:	यण स्वरसन्धि:

जयति – wins, excels

एक: - One

<u>समासा:</u>

दारुणचित्तव्याघ्रं

धीरमनः

खड्गधारया

अभयारण्ये

स्वैरविहारी

सज्जनहृदयसरोजोन्मीलनकरधीकरप्रसरः । एको यतिवरपूषा निर्दोषश्चरति चिद्गगने ॥२५॥

अन्वय:

एको यतिवर निर्दोष: पूषा चिद्गगने चरति सज्जनहृदयसरोजोन्मीलनकरधीकरप्रसरः ॥२५॥

One, eminent amongst those who have subjugated their senses, is a spotless Sun moving in the sky of Consciousness, makes the lotus open (bloom) within the hearts of good people, spreading rays of Knowledge.

शब्दार्थ: विवरणं च

एको यतिवरपूषा निर्दोषश्चरति चिद्गगने ॥२५॥

एको यतिवर-पूषा निर्दोष:-चरति चिद्-गगने

एको यतिवर-पूषा निर्दोष:-चरति चिद्-गगने

एको यतिवरपूषा - एक: यतिवरपूषा उकार: विसर्ग सन्धि: + गुण स्वरसन्धि:

एको – One, Unique, Alone

एक (वि) - साधारणं तु सामान्यमेकाकी त्वेक एककः। विशेष्यनिघ्नवर्गः । अर्थः - असहायः

एक (वि) - भिन्नार्थका अन्यतर एकस्त्वोऽन्येतरावपि। विशेष्यनिघ्नवर्गः। अर्थः - भिन्नार्थकाः

एक (वि) - वृन्दारकौ रूपिमुख्यावेके मुख्यान्यकेवलाः। नानार्थवर्गः । अर्थः - अन्यः, केवलः, मुख्यः

यतिवर – pre-eminent amongst those have subjugated their senses

यति (पुं) - ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते। अर्थः – निर्जितेन्द्रिययतिः

वर (नपुं) - काश्मीरजन्माग्निशिखं वरं वाह्लीकपीतने। मनुष्यवर्गः। अर्थः - कुङ्कुमम्

वर (पुं) - व्यधो वेधे पचा पाके हवो हूतौ वरो वृत्तौ। सङ्कीर्णवर्गः। अर्थः - वेष्टनसम्भक्तिः

पूषा - Sun

पूषन् नकारान्तः पुंलिङ्गः ; प्रथमा – पूषा पूषणौ पूषणः

पूषन् (पुं) - विकर्तनार्कमार्तण्डमिहिरारुणपूषणः। अर्थः – सूर्यः

निर्दोष: - without defect

दोष (पुं) - दोषो वातादिके दोषा रात्रौ दक्षोऽपि कुक्कुटे। अर्थः – वातादयः

चरति - moves

चिद्-गगने – in the sky of Consciousness

चिद्गगने – चिद् गगने – चित् गगने जश्त्व सन्धि:

चित् (स्त्री) – प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतना। अर्थः – बुद्धिः

गगन (नपुं) - नभोऽन्तरिक्षं गगनमनन्तं सुरवर्त्म खम्। अर्थः – आकाशः

सज्जनहृदयसरोजोन्मीलनकरधीकरप्रसरः ।

सज्जन-हृदय-सरोज-उन्मीलनकर-धीकर-प्रसरः

सज्जन-हृदय-सरोज-उन्मीलनकर-धीकर-प्रसरः

सज्जन – सत् जन – good person

सज्जन – सत् जन श्चुत्व सन्धि:

सज्जन (पुं) – महाकुलकुलीनार्यसभ्यसज्जनसाधवः। अर्थः – कुलीनः

हृदय सरोज - -heart lotus

हृदय (नपुं) - चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः। अर्थः - मनस्

उन्मीलन कर- causes opening

कर - करोति, कीर्यते अनेन इति, कृ-कॄ-अप् प्रत्यय

धीकर – awakens knowledge (creates intellect), or rays of knowledge

धी (स्त्री) - बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः। अर्थः – बुद्धिः

कर (पुं) -भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियाम्। अर्थः – किरणः

प्रसरः – spread

प्रसर (पुं) - संस्तवः स्यात्परिचयः प्रसरस्तु विसर्पणम्। अर्थः – व्रणादिविसरणम्

<u>समासा:</u>

सज्जनहृदयसरोजोन्मीलनकरधीकरप्रसरः

यतिवरपूषा

कुवलयविकासकारणमज्ञानध्वान्तकौमुदीप्रज्ञः । शुद्धो मुनीन्द्रचन्द्रः सुरसेव्ये लसति विष्णुपदे ॥२६॥

<u>अन्वय:</u>

कुवलयविकासकारणम् अज्ञानध्वान्तकौमुदीप्रज्ञः शुद्धो मुनीन्द्रचन्द्रः सुरसेव्ये विष्णुपदे लसति ॥२६॥

The Lord of Silent Sages, is a pure moon who causes waterlilies to bloom (in the heart), and whose wisdom is moonlight that removes the deep darkness of ignorance, who is served by the gods, and who frolics at the feet of Vishnu (or who shines having reached the status of Vishnu).

<u>शब्दार्थ: विवरणं च</u>

कुवलयविकासकारणमज्ञानध्वान्तकौमुदीप्रज्ञः

कुवलय-विकास-कारणम्-अज्ञान-ध्वान्त कौमुदी-प्रज्ञः

कुवलय-विकास-कारणम्-

कुवलय – water lily

कुवलय (नपुं) - स्यादुत्पलं कुवलयमथ नीलाम्बुजन्म च। अर्थः – कुवलयम्

विकास – expanding, blossoming

कारणम् - cause

कारण (नपुं) - हेतुर्ना कारणं बीजं निदानं त्वादिकारणम्। अर्थः – कारणम्

अज्ञान-ध्वान्त कौमुदी-प्रज्ञः

अज्ञान- ignorance

अज्ञान (नपुं) - मोक्षोऽपवर्गोऽथाज्ञानमविद्याहंमतिः स्त्रियाम्। अर्थः – अज्ञानम्

ध्वान्त – veiled, darkness, covered

ध्वान्त (नपुं) - अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः। अर्थः – अन्धकारः

कौमुदी – moonshine, moonlight

कौमुदी (स्त्री) - चन्द्रिका कौमुदी ज्योत्स्ना प्रसादस्तु प्रसन्नता। अर्थः - ज्योत्स्ना

प्रज्ञः – wise

ज्ञ (पुं) - धीरो मनीषी ज्ञः प्राज्ञः संख्यावान्पण्डितः कविः। ब्रह्मवर्गः। अर्थः – विद्वान्

शुद्धो मुनीन्द्रचन्द्रः सुरसेव्ये लसति विष्णुपदे

शुद्धो मुनीन्द्र-चन्द्रः सुर-सेव्ये लसति विष्णुपदे

शुद्धो मुनीन्द्रचन्द्रः – शुद्धः मुनीन्द्रचन्द्रः उकार: विसर्ग सन्धिः , + गुण स्वरसन्धिः

शुद्धो - clean

मुनीन्द्र – king of ascetics

मुनि (पुं) - मुनीन्द्रः श्रीघनः शास्ता मुनिः शाक्यमुनिस्तु यः। अर्थः – बुद्धः

मुनि (पुं) - तपस्वी तापसः पारिकाङ्क्षी वाचंयमो मुनिः। अर्थः – मौनव्रतिः

इन्द्र (पुं) - इन्द्रो मरुत्वान् मघवा बिडौजाः पाकशासनः। अर्थः – इन्द्रः

इन्द्र (पुं) - इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत्। अर्थः - पूर्वदिशायाः स्वामी

चन्द्रः - moon

चन्द्र (पुं) - हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः. अर्थः – चन्द्रः

सुर-सेव्ये – served by devas

सुर (पुं) - अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः। अर्थः – देवः

सेव्ये- - सेव् + ण्यत्, सेव्य शब्दः, सप्तमी एक

सेव्ये – सेव् धातः, भावकर्मणोः, आत्मनेपदम्, लट् लकारः, उत्तम परुषः एक

लसति – frolics, shines

विष्णुपदे – in the status of Vishnu

विष्णु (पुं) - विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः। अर्थः – विष्णुः

पद (नपुं) - पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु। अर्थः – वस्तु, चरणः, चिह्नम्, स्थानं, त्राणनम्, व्यवसितिः

<u>समासा:</u>

वलयविकासकारणमज्ञानध्वान्तकौमुदीप्रज्ञः

मुनीन्द्रचन्द्रः

सुरसेव्ये

विष्णुपदे

स्वानन्दामृतसेकैरान्तरसंतापसंततिं शमयन् । चित्रमचञ्चलवृत्तिश्चिद्व्योमनि भाति योगिवर्यघनः ॥२७॥

<u>अन्वय:</u>

योगिवर्यघनः अचञ्चलवृत्तिः, स्वानन्दामृतसेकै: अन्तरसंतापसंततिं शमयन्, चिद् व्योमनि भाति, चित्रम् ॥२७॥

The eminent ascetic with an unwavering purpose, calming all hot inner turmoil in others with sprinkles of his own Bliss nectar, glows in the expanse (sky) of consciousness, an amazing picture indeed!

<u>शब्दार्थ: विवरणं च</u>

स्वानन्दामृतसेकैरान्तरसंतापसंततिं शमयन् ।

स्व-आनन्द-अमृत-सेकैः-अन्तर-संताप-संततिं शमयन् ।

स्वानन्दामृतसेकैरान्तरसंतापसंततिं = स्वानन्दामृतसेकैः अन्तरसंतापसंततिं विसर्ग रेफः सन्धिः

स्वानन्दामृतसेकैः = स्वानन्द अमृतसेकैः सवर्णदीर्घ स्वरसन्धिः ।

स्व-आनन्द – own bliss

स्व (पुं) - स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने। अर्थः – आत्मा, धनम्, आत्मीयम्

स्व (पुं) - सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः। अर्थः - सगोत्रः

आनन्द (पुं) - स्यादानन्दथुरानन्दः शर्मशातसुखानि च। अर्थः – आनन्दः

अमृत-सेकैः - nectar droplets (sprinking)

अमृत (नपुं) - स्यात्सुधर्मा देवसभा पीयूषममृतं सुधा। अर्थः - अमृतम्

अमृत (नपुं) - मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम्। अर्थः – मोक्षः

अमृत (नपुं) - पयः कीलालममृतं जीवनं भुवनं वनम्। अर्थः – जलम्

अमृत (नपुं) - अमृतं विघसो यज्ञशेषभोजनशेषयोः। अर्थः – यज्ञशेषः

अमृत (नपुं) - द्वे याचितायाचितयोर्यथासंख्यं मृतामृते। अर्थः – अयाचितः

सेकः [सिच्-घञ्]

अन्तर-संताप-संततिं – all inner turmoil

अन्तर (नपुं) – अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये। अर्थः – अवकाशः, अवधिः, अवसरः, अन्तर्धानम्, अन्तरात्मा, आत्मीयम्, बहिः, बिलम्, भेदः, परिधानम्

सन्तति [पुमान्, स्त्रीः]

शमयन् – while calming

शमयन् - शम् धातुः, णिजन्ते, शतृ

चित्रमचञ्चलवृत्तिश्चिद्व्योमनि भाति योगिवर्यघनः

चित्रं-अचञ्चल-वृत्तिः-चिद्-व्योमनि भाति योगि-वर्य-घनः

चित्रमचञ्चलवृत्तिश्चिद्व्योमनि = चित्रमचञ्चलवृत्तिः चिद्व्योमनि सकार विसर्ग सन्धिः + श्चुत्व सन्धिः

चित्रं- picture

चित्र (नपुं) - चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे। अर्थः – नानावर्णाः

चित्र (वि) - विस्मयोऽद्भुतमाश्चर्यं चित्रमप्यथ भैरवम्। अर्थः – अद्भुतरसः

चित्र (नपुं) - आलेख्याश्चर्ययोश्चित्रं कलत्रं श्रोणिभार्ययोः। अर्थः – आलेख्यम्

अचञ्चल-वृत्तिः- - unshakeable purpose

चञ्चल (वि) - चञ्चलं तरलं चैव पारिप्लवपरिप्लवे। अर्थः – चलनम्

वृत्ति (स्त्री) - आजीवो जीविका वार्ता वृत्तिर्वर्तनजीवने। अर्थः – जीवनोपायः

वृत्ति (स्त्री) - व्यधो वेधे पचा पाके हवो हूतौ वरो वृत्तौ। अर्थः – वेष्टनसम्भक्तिः

वृत्ति (स्त्री) - प्रकृतिर्योनिलिङ्गे च कैशिक्याद्याश्च वृत्तयः. अर्थः – कैशिक्याद्याः

चिद्-व्योमनि – in the expanse (sky) of Cit

चित् (स्त्री) – प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतना। धीवर्गः। अर्थः - बुद्धिः

चित् (अव्य) - यत्तद्यतस्ततो हेतावसाकल्ये तु चिच्चन। अव्ययवर्गः। अर्थः – असाकल्यम्

व्योमन् (नपुं) - द्योदिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरम्। व्योमवर्गः। अर्थः - आकाशः

भाति – glows, radiates

योगि-वर्य-घनः – solid, eminent ascetic

वर्य (वि) - मुख्यवर्यवरेण्याश्च प्रवर्होऽनवरार्ध्यवत्। विशेष्यनिघ्नवर्गः। अर्थः – श्रेष्ठम्

घन (पुं) - घनजीमूतमुदिरजलमुग्धूमयोनयः। दिग्वर्गः। अर्थः - मेघः

घन (नपुं) - वंशादिकं तु सुषिरं कांस्यतालादिकं घनम्। नाट्यवर्गः। अर्थः - कांस्यतालादिवाद्यम्

घन (नपुं) - विलम्बितं द्रुतं मध्यं तत्त्वमोघो घनं क्रमात्। नाट्यवर्गः। अर्थः - मध्यसमयनृत्यगीतवाद्यम्

घन (पुं) - द्रुघणो मुद्गरघनौ स्यादीली करवालिका। क्षत्रियवर्गः । अर्थः - मुद्गरः

घन (पुं) - घनं निरन्तरं सान्द्रं पेलवं विरलं तनु। विशेष्यनिघ्नवर्गः। अर्थः - निबिडम्

घन (पुं) - घनो मेघे मूर्तिगुणे त्रिषु मूर्ते निरन्तरे। नानार्थवर्गः । अर्थः - कठिनगुणः, कठिनम्, निरन्तरम्

<u>समासा:</u>

स्वानन्दामृतसेकै:

अन्तरसंतापसंततिं

अचञ्चलवृत्ति:

चिद्व्योमनि

योगिवर्यघनः

सुमनःसौरभमञ्जुलसञ्चारनिवारिताखिलश्रान्तिः । संयमिचारुसमीरो विहरत्यानन्दसंविदारामे ॥२८॥

<u>अन्वय:</u>

संयमिचारुसमीर: सुमनःसौरभमञ्जुलसञ्चार-निवारिताखिलश्रान्तिः आनन्दसंविद् आरामे विहरति ॥२८॥

One who is self-restrained is a lovely breeze, spreads the pleasing fragrance of the pure mind, removes all tiredness, strolls in the grove of Bliss arising from Knowledge.

<u>शब्दार्थ: विवरणं च</u>

सुमनःसौरभमञ्जुलसञ्चारनिवारिताखिलश्रान्तिः ।

सुमनः-सौरभ-मञ्जुल-सञ्चार-निवारित-अखिल-श्रान्तिः

सुमनःसौरभमञ्जुलसञ्चार = सुमनः + सौरभमञ्जुलसञ्चार   सकार: विसर्ग सन्धि:

सुमनःसौरभमञ्जुलसञ्चार – pure mind, which is a garden spreading fragrance

सुमनः – gracious, well pleased, benevolent

मनस् [नपुंसकम्] ; प्रथमा – मनः मनसी मनांसि

सौरभ - fragrance

मञ्जुल -arbor, garden, attractive, Lovely, beautiful, agreeable, charming, sweet, melodious

मञ्जुल (वि) - कान्तं मनोरमं रुच्यं मनोज्ञं मञ्जु मञ्जुलम्। अर्थः – मनोरमम्

सञ्चार – communication (spreading)

निवारिताखिलश्रान्तिः = निवारित + अखिलश्रान्तिः सवर्णदीर्घ स्वरसन्धिः ।

निवारिताखिलश्रान्तिः – all fatigue removed

निवारित – prevented, deterred

निवारित – नि उपसर्गः, वृ धातुः, क्त प्रत्ययः

अखिल – whole, entire

अखिल (वि) - विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम्। अर्थः – समग्रम्

श्रान्तिः – fatigue

संयमिचारुसमीरो विहरत्यानन्दसंविदारामे

संयमि-चारु-समीरो विहरति-आनन्द-संविद-आरामे

संयमिचारुसमीरो विहरति = संयमिचारुसमीरः विहरति उकारः विसर्ग सन्धिः

संयमिचारुसमीरः - pleasant breeze of self control

संयमि – self control (not संयमी)

संयमिन् [पुमान्]। प्रथमा – संयमी संयमिनौ संयमिनः

संयमिन् [नपुंसकम्]। प्रथमा – संयमि संयमिनी संयमीनि

चारु- elegant, pretty

चारु (वि) - सुन्दरं रुचिरं चारु सुषमं साधु शोभनम्। अर्थः – मनोरमम्

समीरो - breeze

समीर (पुं) – समीरमारुतमरुज्जगत्प्राणसमीरणाः। अर्थः – वायुः

विहरत्यानन्दसंविदारामे = विहरति + आनन्दसंविदारामे यण स्वरसन्धिः।

विहरति – roams, enjoys

आनन्दसंविदारामे = आनन्दसंवित् आरामे जशत्व व्यञ्जन सन्धिः।

आनन्दसंविद् आरामे – in orchard of joyful intellect

आनन्द - joy

आनन्द (पुं) - स्यादानन्दथुरानन्दः शर्मशातसुखानि च। अर्थः – आनन्दः

संविद् - intellect

संविद् (स्त्री) – प्रेक्षोपलब्धिश्चित्संवित्प्रतिपत्ज्ञाप्तिचेतना। अर्थः – बुद्धिः

संविद् (स्त्री) - संविदागूः प्रतिज्ञानं नियमाश्रयसंश्रवाः। अर्थः – अङ्गीकारः

संविद् (स्त्री) - स्त्री संविज्ज्ञानसंभाषाक्रियाकाराजिनामसु। अर्थः – ज्ञानम्, क्रियाकारः, सम्भाषणम्, युद्धम्

आरामे – grove, place of pleasure, orchard

आराम (पुं) - आरामः स्यादुपवनं कृत्रिमं वनमेव यत्। अर्थः – कृत्रिमवृक्षसमूहः

<u>समासा:</u>

सौरभमञ्जुलसञ्चार

निवारिताखिलश्रान्तिः
संयमिचारुसमीरः
आनन्दसंविदारामे

निःश्रेयससरसफले निर्मलविज्ञानपल्लवमनोज्ञे । वीतभये विपिनतले यतिशितिकण्ठो विभाति कोऽप्येकः ॥२१॥

अन्वयः
कोऽप्येकः यतिशितिकण्ठो विभाति वीतभये विपिनतले निर्मलविज्ञानपल्लवमनोज्ञे निःश्रेयससरसफले ॥२१॥

A unique ascetic, like a peacock, displays in a forest, with of all fear dissipated, on pleasing fresh shoots of spotless Knowledge, in the tasty fruit that is ultimate good (Moksha).

शब्दार्थः विवरणं च
निःश्रेयससरसफले निर्मलविज्ञानपल्लवमनोज्ञे ।
निःश्रेयस-सरस-फले निर्मल-विज्ञान-पल्लव-मनोज्ञे

निःश्रेयस – ultimate bliss, moksha

निःश्रेयस (नपुं) - मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम्। अर्थः – मोक्षः

सरस-फले – in tasty fruit

फल (नपुं) - वृक्षादीनां फलं सस्यं वृन्तं प्रसवबन्धनम्. अर्थः – वृक्षफलम्

निर्मल- spotless, unsullied

मल (पुं-नपुं) - तिलकं क्लोम मस्तिष्कं गोर्दं किट्टं मलोऽस्त्रियाम्। अर्थः - मलम्

मल (पुं-नपुं) - मलोऽस्त्री पापविट्किट्टान्यस्त्री शूलं रुगायुधम्। अर्थः – पापम्, पुराणकिट्टम्

विज्ञान- wisdom of mind (in liberation)

विज्ञान (नपुं) - मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः। अर्थः – शिल्पादिविषयकबुद्धिः

पल्लव- sprout, branch

पल्लव (पुं-नपुं) - पल्लवोऽस्त्री किसलयं विस्तारो विटपोऽस्त्रियाम्। अर्थः – नूतनपत्रम्

मनोज्ञे – charming

मनोज्ञ (विं) - कान्तं मनोरमं रुच्यं मनोज्ञं मञ्जु मञ्जुलम्। अर्थः – मनोरमम्

वीतभये विपिनतले यतिशितिकण्ठो विभाति कोऽप्येकः
वीतभये विपिनतले यति-शितिकण्ठो विभाति कोऽप्येकः

वीतभये - fearless, fear dissipated

वीत (नपुं) - वीतं त्वसारं हस्त्यश्वं वारी तु गजबन्धनी। अर्थः – निर्बलहस्त्यश्वसमूहः

भय (नपुं) - चतुर्दश दरस्त्रासो भीतिर्भीः साध्वसं भयम्। अर्थः – भयम्

विपिनतले forest grove

विपिन (नपुं) - अटव्यरण्यं विपिनं गहनं काननं वनम्। अर्थः – वनम्

यति- one who has conquered senses

यतिन् [पुमान्] ascetic, प्रथमा - यती   यतिनौ   यतिनः

यति (पुं) - ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते। अर्थः – निर्जितेन्द्रिययतिः

शितिकण्ठो – peacock, shiva

शितिकण्ठ (पुं) - उग्रः कपर्दी श्रीकण्ठः शितिकण्ठः कपालभृत्। अर्थः - शिवः

विभाति - shines

कोऽप्येकः – someone unique

कोऽप्येकः – क उ अप्येक: - क: अप्येक: उकार: विसर्ग सन्धि: + गुण स्वरसन्धि:

अप्येक: - अपि एक: यण स्वरसन्धि:

<u>समासा:</u>

निःश्रेयससरसफले

निर्मलविज्ञानपल्लवमनोज्ञे

यतिशितिकण्ठो

निःसारभुवनमरुतलमुत्सार्यानन्दसाररसपूर्णे । वरसरसि चिन्मयेऽस्मिन् परहंसः कोऽपि दीव्यति स्वैरम् ॥ ३०॥

<u>अन्वय:</u>

कोऽपि परहंसः, निःसारभुवनमरुतलमुत्सारि, अस्मिन् आनन्दसाररसपूर्णे चिन्मये वरसरसि स्वैरम् दीव्यति ॥ ३०॥

Some supreme swan (muni), having pushed away the impeding desert that is this essenceless world, shines with freedom, in this superb ocean of Consciousness that is the filled with essence of Bliss

<u>शब्दार्थ: विवरणं च</u>

निःसारभुवनमरुतलमुत्सार्यानन्दसाररसपूर्णे

निःसार-भुवन-मरुतलम्-उत्सारि-आनन्द-साररस-पूर्णे

निःसारभुवनमरुतलमुत्सार्यानन्दसाररसपूर्णे – निःसारभुवनमरुतलमुत्सारि + आनन्दसाररसपूर्णे   यण स्वरसन्धि:

निःसार - worthless, sapless

भुवन- a world

भुवन (नपुं) - पयः कीलालममृतं जीवनं भुवनं वनम्। अर्थः - जलम्

भुवन (नपुं) - त्रिष्वथो जगती लोको विष्टपं भुवनं जगत्। अर्थः – लोकः

मरु-तलम्- desert soil, pushing away the great shock of the desert

मरु (पुं) - समानौ मरुधन्वानौ द्वे खिलाप्रहते समे। अर्थः - निर्जलदेशः

मरु (पुं) - किंशारु सस्यशूकेषु मरु धन्वधराधरौ। अर्थः – पर्वतः

तल (नपुं) - कोटिरस्याटनी गोधातले ज्याघातवारणे। अर्थः - ज्याघातवारणः

तल (नपुं) - अधस्स्वरूपयोरस्त्री तलं स्याच्चामिषे पलम्। अर्थः – अधः, स्वरूपः

उत्सारि - pushed away, removing

उत्सारिन् – नपुंसकम् ; प्रतमा - उत्सारि   उत्सारिणी   उत्सारीणि

उत्सारिन् – पुंमान्; प्रतमा - उत्सारी   उत्सारिणौ उत्सारिणः

आनन्द – bliss, joy

साररस- liquid (juice) essence

पूर्णे – in fullness, in completeness

वरसरसि चिन्मयेऽस्मिन् परहंसः कोऽपि दीव्यति स्वैरम्

वर-सरसि चिन्मये-अस्मिन् परहंसः कोऽपि दीव्यति स्वैरम्

वर-सरसि – in the most excellent lake

वर (नपुं) - काश्मीरजन्माग्निशिखं वरं वाह्लीकपीतने। अर्थः - कुङ्कुमम्

वर (पुं) - व्यधो वेधे पचा पाके हवो हूतौ वरो वृत्तौ। अर्थः - वेष्टनसम्भक्तिः

वर (पुं) - देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीबं मनाक्प्रिये। अर्थः - देवाद्वृतः, मनाक्प्रियः, श्रेष्ठः

चिन्मयेऽस्मिन् – चिन्मये अस्मिन्   पूर्वरूप स्वरसन्धि:

चिन्मये – चित् मये   अनुनासिक व्यञ्जनसन्धि:

चिन्मये- in pure intellegence, in Supreme Spirit

अस्मिन् – in this

परहंसः – short for परमहंस – divine swan

कोऽपि = क उ अपि = क: अपि   उकार विसर्ग सम्धि: + गुण स्वरसन्धि:

कोऽपि – somebody - someone unique

दीव्यति – is bright and plays

स्वैरम् – self-willed, spontaneous, unrestrained

स्वैर (वि) - मन्दस्वच्छन्दयोः स्वैरः शुभ्रमुद्दीप्तशुक्लयोः। अर्थः – अलसः, स्वच्छन्दः

<u>समासा:</u>

निःसारभुवनमरुतलमुत्सारि

आनन्दसाररसपूर्णे

वरसरसि

परहंसः

निखिलागमपल्लविते निगमशिरस्तन्त्रशीतलोद्याने । मधुरतरमञ्जुवाचः कूजन्नास्ते यतीन्द्रकलकण्ठः ॥३१॥

<u>अन्वय:</u>

यतीन्द्रकलकण्ठः मधुरतरमञ्जुवाचः निखिलागमपल्लविते निगमशिरस्तन्त्रशीतलोद्याने कूजन्नास्ते ॥३१॥

The Lord of Ascetics, a dove, coos most sweet and agreeable words, amongst sprouts emerging from all the vedas, in the cool garden of Upanishadic knowledge

शब्दार्थ: विवरणं च

निखिलागमपल्लविते निगमशिरस्तन्त्रशीतलोद्याने ।

निखिल-आगम-पल्लविते निगम-शिर:-तन्त्र-शीतल-उद्याने ।

निखिल - entire

निखिल (वि) - विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम्। अर्थः – समग्रम्

आगम – arrival, approach, traditional sacred writings (Vedas)

पल्लविते – having young shoots, extended

निगम – the Veda

निगम (पुं) - स्थानीयं निगमोऽन्यत्तु यन्मूलनगरात्पुरम्। अर्थः - नगरम्

निगम (पुं) - वणिक्पथः पुरं वेदो निगमो नागरो वणिक्। अर्थः – मूलनगरादन्यनगरम्, वणिक्पथः, वेदः

शिर: - head

शिरस् (पुं-नपुं) - शिरोग्रं शिखरं वा ना मूलं बुध्नोऽङ्घ्रिनामकः. अर्थः - शिखरम्

शिरस् (नपुं) - उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम्. अर्थः - शिरः

शिरस् (नपुं) - कुम्भौ तु पिण्डौ शिरसस्तयोर्मध्ये विदुः पुमान्. अर्थः - गजमस्तकौ

तन्त्र – authority, technique

तन्त्र (नपुं) - तन्त्रं प्रधाने सिद्धान्ते सूत्रवाये परिच्छदे। अर्थः – परिच्छदः, प्रधानम्, सिद्धान्तः, सूत्रवायः

शीतल - cool

शीतल (वि) - तुषारः शीतलः शीतो हिमः सप्तान्यलिङ्गकाः। अर्थः - शीतलद्रव्यम्

शीतल (पुं) - स्याद्वातकः शीतलोऽपराजिता शणपर्ण्यपि। अर्थः – शणपर्णी

उद्याने – in garden

उद्यान (नपुं) - पुमानाक्रीड उद्यानं राज्ञः साधारणं वनम्। अर्थः - सर्वोपभोग्यवनम्

उद्यान (नपुं) - स्यादुद्यानं निःसरणे वनभेदे प्रयोजने। अर्थः – निःसरणम्, प्रयोजनम्

मधुरतरमञ्जुवाचः कूजन्नास्ते यतीन्द्रकलकण्ठः

मधुरतर-मञ्जु-वाचः कूजन् आस्ते यतीन्द्र-कलकण्ठः

मधुरतर- most sweet

मधुर (पुं) - तुवरस्तु कषायोऽस्त्री मधुरो लवणः कटुः। अर्थः - मधुररसः

मधुर (वि) - स्वादुप्रियौ च मधुरौ क्रूरौ कठिननिर्दयौ। अर्थः – मधुरम्, प्रियम्

मञ्जु-वाचः - agreeable words

मञ्जु (वि) - कान्तं मनोरमं रुच्यं मनोज्ञं मञ्जु मञ्जुलम्। अर्थः – मनोरमम्

कूजन्नास्ते = कूजन् आस्ते ङमुडागम व्यञ्जन सन्धिः

कूजन् – chirping, singing inarticulately

कूजन् – कूज् धातु, शतृ प्रत्ययः

आस्ते - stays

यतीन्द्र – king of ascetics

यतीन्द्र = यति इन्द्र सवर्णदीर्घ स्वरसन्धिः ।

यति (पुं) - ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते। अर्थः – निर्जितेन्द्रिययतिः
इन्द्र (पुं) - इन्द्रो मरुत्वान् मघवा बिडौजाः पाकशासनः। अर्थः - इन्द्रः
इन्द्र (पुं) - इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत्। अर्थः - पूर्वदिशायाः स्वामी
कलकण्ठः - cuckoo with pleasant voice

समासा:
निखिलागमपल्लविते
निगमशिरस्तन्त्रशीतलोद्याने
मधुरतरमञ्जुवाचः
यतीन्द्रकलकण्ठः

दारितमोहमदेभो दूरीकृतसकलदुरितशार्दूलः । विबुधोत्तमसिंहवरो विहरत्यानन्दविततकान्तारे ॥३२॥

अन्वय:
दारितमोहमदेभो दूरीकृतसकलदुरितशार्दूलः विबुधोत्तमसिंहवरो आनन्दविततकान्तारे विहरति ॥३२॥

Having torn asunder the elephants of delusion and arrogance, having driven away all tigers of wickedness, the best among exceptionally wise men, an extraordinary lion, wanders in the spreadout wilderness of Bliss.

शब्दार्थ: विवरणं च
दारितमोहमदेभो दूरीकृतसकलदुरितशार्दूलः
दारित-मोह-मद-इभो दूरीकृत-सकल-दुरित-शार्दूलः
दारित - torn, divided
दारित mfn. (-तः-ता-तं) दॄ धातु , दॄ to tear, to divide, affix क्त ।
दारित (वि) - सिद्धे निर्वृत्तनिष्पन्नौ दारिते भिन्नभेदितौ। अर्थः - भेदं प्रापितः
मोह – delusion, fooolishness
मोह (पुं) - मूर्छा तु कश्मलं मोहोऽप्यवमर्दस्तु पीडनम्। अर्थः – मूर्च्छा
मद - arrogance
मद (पुं) - दर्पोऽवलोकोऽवष्टम्भश्चित्तोद्रेकः स्मयो मदः। अर्थः - मदः
मद (पुं) - गण्डः कटो मदो दानं वमथुः करशीकरः। अर्थः - मदजलम्
मद (पुं) - निगादो निगदे मादो मद उद्वेग उद्भ्रमे। अर्थः – आनन्दः
इभो - elephant, servants, dependants, fearless power
इभ (पुं) - इभः स्तम्बेरमः पद्मी यूथनाथस्तु यूथपः। अर्थः - हस्तिः
दूरीकृत – repelled, exceeded, surpassed
दूरीकृत। कृत - कृ धातु, क्त प्रत्यय
सकल – total, all

सकल (वि) - समग्रं सकलं पूर्णमखण्डं स्यादनूनके। अर्थः - समग्रम्

दुरित – wicked, sinful, evil, discomfort

दुरित - mfn. (-तः-ता-तं) दुर् vile, bad, and इत gone, become. दुष्टम् इतम् गमनम् अस्मात्

दुरित (नपुं) - कलुषं वृजिनैनोऽघमंहो दुरितदुष्कृतम्. अर्थः - पापम्

शार्दूलः – tiger, rakshasa

शार्दूल (पुं) - शार्दूलद्वीपिनौ व्याघ्रे तरक्षुस्तु मृगादनः, अर्थः – व्याघ्रः

विबुधोत्तमसिंहवरो विहरत्यानन्दविततकान्तारे

विबुध-उत्तम-सिंहवरो विहरति-आनन्द-वितत-कान्तारे

विबुधोत्तमसिंहवरो – विबुध: उत्तमसिंहवरो   विसर्ग लोप सन्धि:

विबुधोत्तमसिंहवरो विहरति – विबुधोत्तमसिंहवर: विहरति   विसर्ग उकार सन्धि: + गुण स्वरसन्धि:

विबुध – wise man, god

विबुध (पुं) - अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः। अर्थः - देवः

उत्तम – first, best, highest

उत्तम (वि) - क्लीबे प्रधानं प्रमुखप्रवेकानुत्तमोत्तमाः। अर्थः – श्रेष्ठम्

सिंहवरो – most excellent lion

सिंह (पुं) - सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिः। अर्थः - सिंहः

विहरत्यानन्दविततकान्तारे – विहरति आनन्दविततकान्तारे   यण स्वरसन्धि:

विहरति – wanders, sports

आनन्द – joy, bliss

वितत – extended, spreadout

कान्तारे – lotus, calamity, symptom, forest, wilderness

कान्तार (नपुं) - प्रान्तरं दूरशून्योऽध्वा कान्तारं वर्त्म दुर्गमम्। अर्थः - चोराद्युपद्रवैर्दुर्गममार्गः

कान्तार (पुं-नपुं) - महारण्ये दुर्गपथे कान्तारं पुन्नपुंसकम्। अर्थः – महावनम्

<u>समासा:</u>

दारितमोहमदेभो

दूरीकृतसकलदुरितशार्दूलः

उत्तमसिंहवरो

अज्ञानमृगवरोज्झितविज्ञानोत्तुङ्गशृङ्गशिखरितले । मतिसलिलशीतलाङ्गो यतिमदकलभो विराजते विहरन् ।।३३।।

<u>अन्वय:</u>

यतिमदकलभो मतिसलिलशीतलाङ्गो अज्ञानमृगवरोज्झितविज्ञानोत्तुङ्गशृङ्गशिखरितले विहरन् विराजते ।।३३।।

The Ascetic, a powerful young elephant, is a branch of the cool stream of understanding, having ejected the beast of ignorance from the lofty pinnacle of clear knowledge, sports and shines in the Essence,

शब्दार्थ: विवरणं च

अज्ञानमृगवरोज्झितविज्ञानोत्तुङ्गश्रृङ्गशिखरितले ।

अज्ञान-मृगवर-उज्झित-विज्ञान-उत्तुङ्ग-श्रृङ्ग-शिखरि-तले ।

अज्ञानमृगवरोज्झित = अज्ञानमृगवर उज्झित = अज्ञानमृगवरः उज्झित विसर्ग लोप सन्धि: + गुण स्वरसन्धि:

अज्ञान – ignorance, unwise

अज्ञान (नपुं) - मोक्षोऽपवर्गोऽथाज्ञानमविद्याहंमतिः स्त्रियाम्। अर्थः – अज्ञानम्

मृगवर – animal, deer

मृग (पुं) - मृगे कुरङ्गवातायुहरिणाजिनयोनयः - अर्थः - हरिणः

मृग (पुं) - गोकर्णपृषतैणर्श्यरोहिताश्चमरो मृगाः। अर्थः - मृगभेदः

मृग (पुं)- संवीक्षणं विचयनं मार्गणं मृगणा मृगः। अर्थः - अन्वेषणम्

मृग (पुं) - पशवोऽपि मृगा वेगः प्रवाहजवयोरपि। अर्थः – पशुः

उज्झित – abandoned, discharged, forsaken

उज्झ् धातु: - क्त उज्झितः,उज्झिता (प्रथमा - उज्झति उज्झतः उज्झन्ति)

विज्ञानोत्तुङ्गश्रृङ्गशिखरितले = विज्ञान उत्तुङ्गश्रृङ्गशिखरितले गुण स्वरसन्धि:

विज्ञान – clear knowledge, discovery

विज्ञानं – वि उपसर्ग: ज्ञा धातु: ल्युट् प्रत्यय:

उत्तुङ्ग – lofty, tall, high, swollen

श्रृङ्ग – pinnacle, peak, horn, lotus

श्रृङ्ग (नपुं) - कूटोऽस्त्री शिखरं श्रृङ्गं प्रपातस्त्वतटो भृगुः। अर्थः - पर्वताग्रः

श्रृङ्ग (पुं) - कूर्चशीर्षो मधुरकः श्रृङ्गह्रस्वाङ्गजीवकाः। अर्थः - जीवकः

श्रृङ्ग (नपुं) - श्रृङ्गं प्राधान्यसान्वोश्च वराङ्गं मूर्धगुह्ययोः। अर्थः - पर्वतसमभूभागः

श्रृङ्ग (नपुं) - श्रृङ्गं प्राधान्यसान्वोश्च वराङ्गं मूर्धगुह्ययोः। अर्थः – प्राधान्यम्

शिखरि – in spray, on peak

शिखरिन् (पुं) - महीध्रे शिखरिक्ष्माभृदहार्यधरपर्वताः। अर्थः - पर्वतः

शिखरिन् (पुं) - तरुशैलौ शिखरिणौ शिखिनौ वह्निबर्हिणौ। अर्थः – वृक्षः

तले - essential nature

तल (नपुं) - कोटिरस्याटनी गोधातले ज्याघातवारणे - अर्थः - ज्याघातवारणः

तल (नपुं) - अधस्स्वरूपयोरस्त्री तलं स्याच्चामिषे पलम् । अर्थः - अधः

तल (नपुं) - अधस्स्वरूपयोरस्त्री तलं स्याच्चामिषे पलम् । अर्थः – स्वरूपः

मतिसलिलशीतलाङ्गो यतिमदकलभो विराजते विहरन्

मति-सलिल-शीतल-अङ्गो यति-मद-कलभो विराजते विहरन्

मतिसलिलशीतलाङ्गो = मतिसलिलशीतल अङ्गो सवर्णदीर्घ स्वरसन्धि:

मति – understanding, intellect, inclination

मति (स्त्री) - बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः। अर्थः – बुद्धिः

सलिल – water, flood, stream, flowing

सलिल (नपुं) - आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम्। अर्थः – जलम्

शीतल – cold, chilly, frigid, coldness

शीतल (वि) - तुषारः शीतलः शीतो हिमः सप्तान्यलिङ्गकाः। अर्थः - शीतलद्रव्यम्

शीतल (पुं) - स्याद्वातकः शीतलोऽपराजिता शणपर्ण्यपि। अर्थः – शणपर्णी

अङ्गो – limb, member, division

अङ्ग (नपुं) - अङ्गं प्रतीकोऽवयवोऽपघनोऽथ कलेवरम्। अर्थः - देहावयवः

अङ्ग (अव्य) - स्युः प्याट्पाडङ्ग हे है भोः समया निकषा हिरुक्। अर्थः - सम्बोधनार्थकः

अङ्ग (अव्य) - पुनरर्थेऽङ्ग निन्दायां दुष्ठु सुष्ठु प्रशंसने। अर्थः – पुनरर्थः।

यतिमदकलभो विराजते = यतिमदकलभ उ विराजते = यतिमदकलभ: विराजते उकार विसर्ग सन्धिः + गुण सन्धिः

यति – sage with passions under control

यति (पुं) - ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते। अर्थः – निर्जितेन्द्रिययतिः

मद - intoxication

मद (पुं) - दर्पोऽवलोकोऽवष्टम्भश्चित्तोद्रेकः स्मयो मदः। नाट्यवर्गः। अर्थः - मदः

मद (पुं) - गण्डः कटो मदो दानं वमथुः करशीकरः। क्षत्रियवर्गः । अर्थः - मदजलम्

मद (पुं) - निगादो निगदे मादो मद उद्वेग उद्भ्रमे। सङ्कीर्णवर्गः। अर्थः - आनन्दःकलभ – young elephant

कलभ – young elephant

विराजते – shines, splendiforous

विहरन् – playing

विहरन् – playing वि उपसर्गः, हृ धातुः, शतृ प्रत्ययः विहरते = क्रीडनार्थकाः 2.1.17 क्रीडति दीव्यति खेलति केलति विहरति कूर्दते लसति रमते विहरते कुमारयति खूर्दते केलायति ललति एलायति खेलायति आक्रीडते अनुक्रीडते संक्रीडते परिक्रीडते

<u>समासा:</u>

अज्ञानमृगवरोज्झितविज्ञानोत्तुङ्गश्रृङ्गशिखरितले

मतिसलिलशीतलाङ्ग:

यतिमदकलभ:

नासाञ्चलनिहिताक्षो नामादिभ्यो निवर्तितस्वान्तः । तटिनीतटेषु तत्त्वं ध्यायन्नास्ते यतिः कोऽपि ॥३४॥

<u>अन्वय:</u>

कोऽपि यतिः, नासाञ्चलनिहिताक्षो, नामादिभ्यो निवर्तितस्वान्तः, तटिनीतटेषु तत्त्वं ध्यायन्नास्ते ॥३४॥

Placing focus on on the tip of the nose, turning away from wealth and name (fame) towards one’s inner self, on the banks of a river, sits meditating on the Reality

<u>शब्दार्थ: विवरणं च</u>

नासाञ्चलनिहिताक्षो नामादिभ्यो निवर्तितस्वान्तः

नासाञ्चल-निहित-अक्षो नाम-आदिभ्यो निवर्तित-स्व-अन्तः

नासाञ्चलनिहिताक्षो – नास + अञ्चलनिहित + अक्षो

नास – nose

अञ्चल – tip, border

निहित – Placed, situated, deposited

निहित - नि + धा धातु: + क्त प्रत्यय:

अक्षो – axis, axle, pivot

अक्ष (पुं) - नाक्षस्तुषः कर्षफलो भूतावासः कलिद्रुमः। अर्थः - विभीतकी

अक्ष (पुं-नपुं) - सौवर्चलेऽक्षरुचके तिलकं तत्र मेचके। अर्थः - मधुरलवणम्

अक्ष (पुं) - ते षोडशाक्षः कर्षोऽस्त्री पलं कर्षचतुष्टयम्। अर्थः - षोडशमाषः

अक्ष (पुं) - पणोऽक्षेषु ग्लहोऽक्षास्तु देवनाः पाशकाश्च ते। अर्थः - अक्षः

अक्ष (पुं) - द्यूतेऽक्षे शारिफलकेऽप्याकर्षोऽथाक्षमिन्द्रिये। अर्थः - चक्रम्, इन्द्रियम्, व्यवहारः

नामादिभ्यो – नामाद् इभ्यो

नामात् – from name

इभ्य - Wealthy, opulent, rich

इभ्य (पुं) - इभ्य आढ्यो धनी स्वामी त्वीश्वरः पतिरीशिता। अर्थः – बहुधनः

निवर्तितस्वान्तः = निवर्तित: स्व अन्तः

निवर्तित - Turned or brought back, averted, removed

निवर्तित - वृत् धातु: (वर्तयति, वर्तति), नि उपसर्ग:, क्त प्रत्यय:

स्व अन्तः – inside oneself

स्व (पुं) - सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः। अर्थः - सगोत्रः

स्व (वि) - स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने। अर्थः – आत्मा, धनम्, आत्मीयम्

तटिनीतटेषु तत्त्वं ध्यायन्नास्ते यतिः कोऽपि

तटिनी-तटेषु तत्त्वं ध्यायन्-आस्ते यतिः कोऽपि

तटिनी - river

तटिनी (स्त्री) - तरङ्गिणी शैवलिनी तटिनी ह्रादिनी धुनी। अर्थः – नदी

तटेषु - banks

तट (वि) - कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु। अर्थः – तीरम्

तत्त्वं – true or essential nature

ध्यायन्नास्ते = ध्यायन् आस्ते

ध्यायन् – thinking, meditating

ध्यायन् - ध्यै धातु: शतृ प्रत्यय:

आस्ते – sits, rests

आस् धातु: - आस्ते

यतिः – self controlled one

कोऽपि – whoever he may be

कोऽपि = क उ अपि = क: अपि उकार विसर्ग सन्धि: + गुण स्वरसन्धिं:

समासा:
नासाञ्चलनिहित
नामादिभ्यो
निवर्तितस्वान्तः
तटिनीतटेषु

आशावसनो मौनी नैराश्यालकृंतः शान्तः । करतलभिक्षापात्रस्तरुतलनिलयो मुनिर्जयति ॥३५॥

अन्वय:
मौनी आशावसन: नैराश्यालकृंतः शान्तः करतलभिक्षापात्र: तरुतलनिलय: मुनि: जयति

The silent sage is victorious, without clothes of desire, adorned by not having expectations, peaceful, using his palms with outstretched fingers as a begging bowl, with home under a tree,

शब्दार्थ: विवरणं च
आशावसनो मौनी नैराश्यालकृंतः शान्तः
आशा-अवसनो मौनी नैराशि-अलकृंतः शान्तः

आशावसनो = आशा अवसनो   सवर्णदीर्घ स्वरसन्धि: ।
आशा – hope, desire
आशा (स्त्री) - दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः। अर्थः - दिक्
आशा (स्त्री) - दशावस्थानेकविधाप्याशा तृष्णापि चायता। अर्थः - आयता तृष्णा
अवसनो – one without clothes
आशावसनो मौनी = आशावसन: मौनी   उकार विसर्ग सन्धि: + गुण स्वरसन्धि:
मौनी – quiet sage
मौनी - [न्] पुं, (मौनमस्यास्तीति । मौन + "अत इनिठनौ ।") मुनिः
मौन (नपुं) - उपस्पर्शस्त्वाचमनमथ मौनमभाषणम्। अर्थः – मौनम्
नैराश्यालकृंतः = नैराशि अलकृंतः   यण स्वरसन्धि:
नैराशि – absence of expectation
अलकृंतः – adorned अलं = भूषणं , नपुँ, अल+अच्
अलकृंतः – अलं + कृ – क्त
शान्तः – peaceful
शान्तः – शम् – क्त
शान्त (वि) - दान्तस्तु दमिते शान्तः शमिते प्रार्थितेऽर्दितः। अर्थः - शमनं प्रापितः

करतलभिक्षापात्रस्तरुतलनिलयो मुनिर्जयति

करतल-भिक्षापात्रः-तरुतल-निलयो मुनिः-जयति

करतलभिक्षापात्रस्तरुतलनिलयो = करतलभिक्षापात्रः तरुतलनिलयो सकार विसर्ग सन्धिः

करतल – palm with outstretched fingers

भिक्षा - mouthful or handful of food, given as alms.

भिक्षा (स्त्री) - सम्मूर्च्छनमभिव्याप्तिर्याञ्चा भिक्षार्थनार्दना। अर्थः - याचनम्

भिक्षा (स्त्री) - प्रेक्षा नृत्येक्षणं प्रज्ञा भिक्षा सेवार्थना भृतिः। अर्थः - भृतिः, सेवा, याचनम्

पात्र - vessel, plate, cup

पात्र (नपुं) - पारावारे परार्वाची तीरे पात्रं तदन्तरम्। अर्थः - तडमध्यवर्तिप्रवाहः

पात्र (नपुं) - हव्यकव्ये दैवपित्र्ये अन्ने पात्रं स्रुवादिकम्। अर्थः - स्रुवादियज्ञपात्राणि

पात्र (नपुं) - सर्वमावपनं भाण्डं पात्रामत्रं च भाजनम्। अर्थः - पात्रम्

पात्र (नपुं) - योग्यभाजनयोः पात्रं पत्रं वाहनपक्षयोः। अर्थः – योग्यः

तरुतलनिलयो मुनिर्जयति = तरुतलनिलयः मुनिर्जयति उकार विसर्ग सन्धिः + गुण स्वरसन्धिः

तरुतल – under a tree, वृक्षमूले

तल (नपुं) - कोटिरस्याटनी गोधातले ज्याघातवारणे। अर्थः - ज्याघातवारणः

तल (नपुं) - अधस्स्वरूपयोरस्त्री तलं स्याच्चामिषे पलम्। अर्थः – अधः, स्वरूपः

निलयो – home, abiding place

मुनिर्जयति = मुनिः जयति रेफः विसर्ग सन्धिः

मुनिः - holy sage, endowed with divinity

मुनि (पुं) - मुनीन्द्रः श्रीघनः शास्ता मुनिः शाक्यमुनिस्तु यः। अर्थः - बुद्धः

मुनि (पुं) - तपस्वी तापसः पारिकाङ्क्षी वाचंयमो मुनिः। अर्थः – मौनव्रतिः

जयति – is victorious

समासा:

नैराश्यालकृंतः

करतलभिक्षापात्रः

तरुतलनिलयः

विजननदीकुञ्जगृहे मञ्जुलपुलिनैकमञ्जुतरतल्पे । शेते कोऽपि यतीन्द्रः समरससुखबोधवस्तुनिस्तन्द्रः ॥३६॥

अन्वयः

कोऽपि यतीन्द्रः समरससुखबोधवस्तुनिस्तन्द्रः विजननदीकुञ्जगृहे मञ्जुलपुलिनैकमञ्जुतरतल्पे शेते ॥३६॥

One, greatest amongst ascetics, equanimous, blissful, awakened to Reality, alert with regards Objects, without company (alone) amongst river vegetation as a house, on a beautiful sandy island as a most pleasant bed, relaxes.

शब्दार्थः विवरणं च

विजननदीकुञ्जगृहे मञ्जुलपुलिनैकमञ्जुतरतल्पे

विजन-नदी-कुञ्ज-गृहे मञ्जुल-पुलिन-एक-मञ्जुतर-तल्पे

विजन – private, solitary

विजन – वि उपसर्ग + जन

विजन (वि) - विविक्तविजनच्छन्ननिःशलाकास्तथा रहः। अर्थः – विजनः

नदी – river

नदी (स्त्री) - स्यादालवालमावालमावापोऽथ नदी सरित्। अर्थः – नदी

कुञ्ज गृहे – in house that is a place overgrown with creeping plants, a bower, an arbour

कुञ्ज (पुं-नपुं) - निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे। अर्थः - लताच्छादितगर्भस्थानम्

कुञ्ज (पुं-नपुं) - धर्मराजौ जिनयमौ कुञ्जो दन्तेऽपि न स्त्रियाम्। अर्थः – दन्तः

मञ्जुलपुलिनैकमञ्जुतरतल्पे = मञ्जुलपुलिन एकमञ्जुतरतल्पे गुण स्वरसन्धिः

मञ्जुल – Beautiful, charming, pleasing.

मञ्जुल (वि) - कान्तं मनोरमं रुच्यं मनोज्ञं मञ्जु मञ्जुलम्। अर्थः – मनोरमम्

पुलिन –island, sandbank, alluvial island

पुलिन (नपुं) - तोयोत्थितं तत्पुलिनं सैकतं सिकतामयम्। अर्थः – जलादचिरनिर्गततडम्

एक - one

एक (वि) - साधारणं तु सामान्यमेकाकी त्वेक एककः। अर्थः - असहायः

एक (वि) - भिन्नार्थका अन्यतर एकस्त्वोऽन्येतरावपि। अर्थः - भिन्नार्थकाः

एक (वि) - वृन्दारकौ रूपिमुख्यावेके मुख्यान्यकेवलाः। अर्थः – अन्यः, केवलः, मुख्यः

मञ्जुतर – most pleasing

तल्पे – on couch, bed

तल्पं - क्ली पुं, (तल्यते शयनार्थं गम्यतेऽत्र)

तल्प (पुं-नपुं) - तल्पं शय्याट्टदारेषु स्तम्बेऽपि विटपोऽस्त्रियाम् । अर्थः – हर्म्याद्युपरिगृहम्, पत्नी, शय्या

शेते कोऽपि यतीन्द्रः समरससुखबोधवस्तुनिस्तन्द्रः

शेते कोऽपि यतीन्द्रः समरस-सुख-बोध-वस्तुनिस्तन्द्रः

शेते – lies, sleeps, rests

कोऽपि - One

कोऽपि = क उ अपि = कः अपि उकार विसर्ग सन्धिः + गुण स्वरसन्धिः

यतीन्द्रः = यति इन्द्रः सवर्णदीर्घ स्वरसन्धिः

यतीन्द्रः – lord of senses

यति (पुं) - ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते। अर्थः – निर्जितेन्द्रिययतिः

समरस- having equal feelings

रस (पुं) - रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी। अर्थः - रसनेन्द्रियविषयः

रस (पुं) - क्षारः काचोऽथ चपलो रसः सूतश्च पारदे। अर्थः - पारदः

रस (पुं) - वोलगन्धरसप्राणपिण्डगोपरसाः समाः। अर्थः - गन्धरसः

रस (पुं) - शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः। अर्थः – गुणः, रागः, शृङ्गारादिः, विषम्, वीर्यम्, द्रवः

सुख - pleasure

सुख (नपुं) - स्यादानन्दथुरानन्दः शर्मशातसुखानि च। अर्थः – आनन्दः

बोध - Awakening, rousing

वस्तु - thing, matter, substance

वस्तु - वस् to abide, तुन्

निस्तन्द्रः = निः यन्द्रः सकार विसर्ग सन्धिः

निस्तन्द्रः - not lazy, fresh, healthy

समासा:

विजननदीकुञ्जगृहे

मञ्जुलपुलिन

एकमञ्जुतरतल्पे

समरससुखबोधवस्तुनिस्तन्द्रः

भूतलमृदुतरशय्यः शीतलवातैकचामरः शान्तः । राकाहिमकरदीपो राजति यतिराजशेखरः कोऽपि ॥३७॥

अन्वय:

कोऽपि भूतलमृदुतरशय्यः शीतलवातैकचामरः शान्तः यतिराजशेखरः राकाहिमकरदीपो राजति ॥३७॥

One, with the earth as a softest bed, with cool breeze as a fan, peaceful, most distinguished king of ascetics, with the cool moon as his lamp, is resplendent.

शब्दार्थ: विवरणं च

भूतलमृदुतरशय्यः शीतलवातैकचामरः शान्तः

भूतल-मृदुतर-शय्यः शीतल-वातैक-चामरः शान्तः

भूतल – earth's surface

मृदुतर – most soft, not sharp

मृदु (वि) - नूत्नश्च सुकुमारं तु कोमलं मृदुलम्मृदु। अर्थः - कोमलम्

मृदु (वि) - त्रिष्विष्टमधुरौ स्वादू मृदू चातीक्ष्णकोमलौ। अर्थः – अतीक्ष्णः

शय्यः – bed, couch

शय्या , स्त्री, शी + क्यप, शेते अस्याम्, शी + क्यप् & अयङ् substituted for the vowel.

शीतलवातैकचामरः = शीतलवात एकचामरः वृद्धि स्वरसन्धिः

शीतल- cool

शीतल (वि) - तुषारः शीतलः शीतो हिमः सप्तान्यलिङ्गकाः। अर्थः - शीतलद्रव्यम्

शीतल (पुं) - स्याद्वातकः शीतलोऽपराजिता शणपर्ण्यपि। अर्थः – शणपर्णी

वात – air, wind

वात (पुं) – नभस्वद्वातपवनपवमानप्रभञ्जनाः। अर्थः – वायुः

एक - one

एक (वि) - साधारणं तु सामान्यमेकाकी त्वेक एककः। अर्थः - असहायः

एक (वि) - भिन्नार्थका अन्यतर एकस्त्वोऽन्येतरावपि। अर्थः - भिन्नार्थकाः

एक (वि) - वृन्दारकौ रूपिमुख्यावेके मुख्यान्यकेवलाः। अर्थः - अन्यः, केवलः, मुख्यः

चामरः A chowrie or bushy tail of the चमरः (Yak) used as a fly-flap or fan, and reckoned as one of the insignia of royalty

चामर (नपुं) - प्रक्रिया त्वधिकारः स्याच्चामरं तु प्रकीर्णकम्। अर्थः – चामरम्

शान्तः – peaceful

शान्त (वि) - दान्तस्तु दमिते शान्तः शमिते प्रार्थितेऽर्दितः। अर्थः - शमनं प्रापि

राकाहिमकरदीपो राजति यतिराजशेखरः कोऽपि

राका-हिमकर-दीपो राजति यतिराज-शेखरः कोऽपि

राकाहिमकरदीपो राजति = राकाहिमकरदीपः राजति उकार विसर्ग सन्धिः

राका- full moon

राका (स्त्री) - कलाहीने सानुमतिः / पूर्णे राका निशाकरे। अर्थः - पूर्णचन्द्रसहिता पूर्णिमा

हिमकर – whose rays are cool, or produces cool

हिम (नपुं) - अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम्। अर्थः - हिमम्

हिम (वि) - तुषारः शीतलः शीतो हिमः सप्तान्यलिङ्गकाः। अर्थः – शीतलद्रव्यम्

दीपो – light source

दीप (पुं) - गेन्दुकः कन्दुको दीपः प्रदीपः पीठमासनम्। अर्थः – दीपः

राजति – shines

यतिराज – king of ascetics

यति (पुं) - ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते। अर्थः – निर्जितेन्द्रिययतिः

शेखरः - The best or most distinguished of a class (at the end of comp.)

शेखर (पुं) - यत्तिर्यक्क्षिप्तमुरसि शिखास्वापीडशेखरौ। अर्थः – शिखास्थमाल्यम्

कोऽपि = क उ अपि = कः अपि उकार विसर्ग सम्धिः + गुण स्वरसन्धिः

कोऽपि one, whoever

<u>समासाः</u>

भूतलमृदुतरशय्यः

शीतलवात

हिमकर - पु० हिमः करः किरणो यस्य हिम करोति निषेवणात् कृ—अच् वा

राकाहिमकरदीपः

यतिराजशेखरः

विपुलशिलातलफलके विमलसरिद्वारिपरिवृतोदारे । मन्दं मलयजपवने वाति प्रस्वपिति कोऽपि यतिराजः ॥ ३८ ॥

अन्वय:
कोऽपि यतिराजः, विपुलशिलातलफलके विमलसरिद्वारिपरिवृतोदारे, मन्दं मलयजपवने वाति, प्रस्वपिति ॥ ३८ ॥

One, King of Ascetics sleeps, on a broad flat stone slab, surrounded by a clean munificent river, in gentle mountain-born breeze of air.

शब्दार्थ: विवरणं च
विपुलशिलातलफलके विमलसरिद्वारिपरिवृतोदारे
विपुल-शिलातल-फलके विमल-सरिद्वारिपरिवृतोदारे

विपुल - Large, extensive, capacious, broad wide, spacious

विपुल (वि) - वड्रोरुविपुलं पीनपीव्नी तु स्थूलपीवरे। अर्थः – विस्तृतम्

शिलातल – rock surface, rock slab

शिला (स्त्री) - अधस्ताद्दारुणिशिला नासा दारूपरि स्थितम्। अर्थः - द्वारस्तम्भाधःस्थितकाष्ठम्

शिला (स्त्री) - पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषत्। अर्थः – पाषाणः

फलके – on a board, plank, slab, tablet, any flat surface

फलक (पुं-नपुं) - फलकोऽस्त्री फलं चर्म संग्राहो मुष्टिरस्य यः। अर्थः – फलकः

विमलसरिद्वारिपरिवृतोदारे = विमलसरिद्वारिपरिवृतः दारे

विमल- clean, pure, spotless

मल (पुं-नपुं) - तिलकं क्लोम मस्तिष्कं गोर्दं किट्टं मलोऽस्त्रियाम्। अर्थः - मलम्

मल (पुं-नपुं) - मलोऽस्त्री पापविट्किट्टान्यस्त्री शूलं रुगायुधम्। अर्थः – पापम्, पुराणकिट्टम्

सरित् - river

सरित् (स्त्री) - स्यादालवालमावालमावापोऽथ नदी सरित्। अर्थः - नदी

वारि – in water

वारि (नपुं) - आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम्। अर्थः – जलम्

परिवृत – turn around, revolve, to roam

उदारे – generous, honest sincere

उदार (वि) - दक्षिणे सरलोदारौ सुकलो दातृभोक्तरि। अर्थः - उदारमनः

उदार (वि) - उदारो दातृमहतोरितरस्त्वन्यनीचयोः। अर्थः – महत्, धाता

मन्दं मलयजपवने वाति प्रस्वपिति कोऽपि यतिराजः

मन्दं – slow, dull

मन्द (पुं) - रौहिणेयो बुधः सौम्यः समौ सौरिशनैश्चरौ। अर्थः – शनीः saturn

मन्द (पुं) - मान्दस्तुन्दपरिमृज आलस्यः शीतकोऽलसोऽनुष्णः। अर्थः - अलसः

मन्द (वि) - मूढाल्पापटुनिर्भाग्या मन्दाः स्युर्द्वौ तु शारदौ। अर्थः – अल्पम्, अपटुः, मूर्खः, निर्भाग्यः

मलयज-पवने – in mountain-born, sandal-scented wind

मलयज (पुं) - गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियाम्। अर्थः – चन्दनः

वाति - air

वाति (पुं) – नभस्वद्वातपवनपवमानप्रभञ्जनाः। अर्थः – वायुः

प्रस्वपिति - goes to sleep

स्वप् धातुः, कर्तरि लट्लकारः (परस्मैपदम्) ; प्रथम पु – स्वपिति। स्वपितः। स्वपन्ति

कोऽपि – special one

कोऽपि = क उ अपि = क: अपि उकार विसर्ग सम्धि: + गुण स्वरसन्धिः

यतिराजः – king of ascetics

<u>समासा:</u>

विपुलशिलातलफलके

विमलसरिद्वारिपरिवृतोदारे

मलयजपवने

यतिराजः

आन्तरमेकं किञ्चित्सन्ततमनुसंदधन्महामौनी । करपुटभिक्षामश्नन्नटति हि वीथ्यां जडाकृतिः कोऽपि ॥३९॥

<u>अन्वय:</u>

कोऽपि महामौनी जडाकृतिः, किञ्चित् आन्तरमेकं सन्ततम् अनुसंदधन्, करपुटभिक्षाम् अश्नन्, वीथ्यां नटति हि ॥३९॥

One unique, great silent sage, with appearance of an imbecile, always continuously enquiring into some innermost entity, eating alms out of his hollowed palms, dances in the streets.

MIS - He (the enlightened one) wanders in the street(s), eating begged food from his palm like a stupid person (जडाकृतिः). That leaves कोऽपि hanging in midair, which could be made to apply to a random enlightened mendicant, unless the following line needs it.

<u>शब्दार्थ: विवरणं च</u>

आन्तरमेकं किञ्चित्सन्ततमनुसंदधन्महामौनी

आन्तरम्-एकं किञ्चित्-सन्ततम्-अनुसंदधन् महामौनी

आन्तरम् – inmost nature

आन्तर त्रीषु लिङ्गेषु अन्तर्मध्ये भवः अण्

एकं – one

किञ्चित् –a few

सन्ततम् – uninterrupted, lasting,

सन्तत (नपुं) – सततानारताश्रान्तसन्तताविरतानिशम्। अर्थः – अविरतम्, continuous

अनुसंदधन् – ascertaining, inquiring

अनुसंदधन् – अनु + सम् + धा धातु:, शतृ प्रत्यय:

महामौनी – great silent ascetic

मौन (नपुं) - उपस्पर्शस्त्वाचमनमथ मौनमभाषणम्। अर्थः – मौनम्

करपुटभिक्षामश्नन्नटति हि वीथ्यां जडाकृतिः कोऽपि

करपुट-भिक्षाम्-अश्नन्-नटति हि वीथ्यां जडाकृतिः कोऽपि

करपुट – palm of hands joined and hollowed

कर (पुं) - भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियाम्। अर्थः - किरणः

कर (पुं) - द्विपाद्यो द्विगुणो दण्डो भागधेयः करो बलिः। अर्थः - बलिः

कर (पुं) - ध्वान्तारिदानवा वृत्रा बलिहस्तांशवः कराः। अर्थः – हस्तः

भिक्षाम् – alms

भिक्षा (स्त्री) - सम्मूर्च्छनमभिव्याप्तिर्याञ्चा भिक्षार्थनार्दना। अर्थः - याचनम्

भिक्षा (स्त्री) - प्रेक्षा नृत्येक्षणं प्रज्ञा भिक्षा सेवार्थना भृतिः। अर्थः – भृतिः, सेवा, याचनम्

अश्नन् – eating

अश्नन् – अश् धातु: शतृ प्रत्यय:

नटति - dances

हि - indeed

वीथ्यां – in street

वीथी (स्त्री) - दशमीस्थौ क्षीणरागवृद्धौ वीथी पदव्यपि। अर्थः – मार्गः

जडाकृतिः – stupid person

कोऽपि = क उ अपि = क: अपि   उकार विसर्ग सन्धि: + गुण स्वरसन्धि:

कोऽपि – someone amongst many

<u>समासा:</u>

करपुटभिक्षाम्

जडाकृतिः

MIS - Look at it as a compound of जड and आकृतिः ; जड, adjective, meaning stupid, foolish, imbecile; and आकृतिः, feminine noun meaning appearance, generic trait (in philosophy), behavior, from class 8 verb आकृ, to take shape. I'd take it as a कर्मधारय compound with the adjective जड modifying आकृतिः, appearance. If you don't still feel tortured enough, आकृतिः splits into आ + कृ + कृत् affix क्तिन् (करणे), the whole thing meaning (your fave obsession विग्रह वाक्य) आक्रियते व्याज्यते जात्यादिकं अनया, by which the appearance and class are known.

Before you question, जड, जल + अच्, is defined as जलति घनीभवति, solidified thing, a stupid person; it also means stagnant water, जडति जडीभवति न प्रवहति.

जड is also a variant जल, where it is defined as जलति लोकान् जीवयति, water.

प्रविलाप्य जगदशेषं परिशिष्टाखण्डवस्तुपरतन्त्रः । प्राश्नाति कबलमास्ये प्राप्तं प्रारब्धकर्मणा कोऽपि ॥४०॥

अन्वयः
कोऽपि, जगदशेषं प्रविलाप्य, परिशिष्टाखण्डवस्तुपरतन्त्रः, प्रारब्धकर्मणा प्राप्तं कबलम् आस्ये प्राश्नाति ॥४०॥

Someone Unique, having collapsed (annihilated) the transitory without remnant, surrendering to the remaining uninterrupted entity, uses his mouth to eat branches and leaves that are obtained through previous works (due to previous lives)

शब्दार्थः विवरणं च
प्रविलाप्य जगदशेषं परिशिष्टाखण्डवस्तुपरतन्त्रः
प्रविलाप्य जगत्-अशेषं परिशिष्ट-अखण्ड-वस्तु-परतन्त्रः

प्रविलाप्य – complete absorption, annihilation

जगत् – moveable, transitory, the world

जगत् (नपुं) - त्रिष्वथो जगती लोको विष्टपं भुवनं जगत्। अर्थः - लोकः

जगत् (वि) - त्रिष्वितो जगदिङ्गेऽपि रक्तं नील्यादि रागि च। अर्थः – चरम्

अशेषं – entire, whole, without remnant

अशेष (वि) - विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम्। अर्थः – समग्रम्

परिशिष्टाखण्डवस्तुपरतन्त्रः = परिशिष्ट + अखण्डवस्तुपरतन्त्रः

परिशिष्ट – left, remaining, supplement, appendix

अखण्ड – unbroken, entire, complete

अखण्ड (विं) - समग्रं सकलं पूर्णमखण्डं स्यादनूनके। अर्थः – समग्रम्

वस्तु – thing, matter, substance, essence

परतन्त्रः – subservient, dependent

परतन्त्र - परस्य तन्त्रमधीनता यत्र । परस्य तन्त्रं इति

परतन्त्र (वि) - परतन्त्रः पराधीनः परवान्नाथवानपि। अर्थः - परतन्त्रः

प्राश्नाति कबलमास्ये प्राप्तं प्रारब्धकर्मणा कोऽपि
प्राश्नाति कबलम् आस्ये प्राप्तं प्रारब्ध-कर्मणा कोऽपि

प्राश्नाति – consumes, eats, enjoys

प्राश्नाति – प्र अश्नाति

कबलमास्ये – कबलम् आस्ये

कबलम् - natural fodder (fed to elephants), consisting of branches and leaves

आस्ये – (from आस्यम्, सप्तमी एक) in face, in mouth, on tongue

आस्य (नपुं) - वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम्। अर्थः – वदनम्

~~आस्ये – अस् धातुः, भावकर्मणोः लङ्लकारः (आत्मनेपदम्) (to go, to shine, to glow, to take)~~

~~आस्ये – आस् धातुः, भावकर्मणोः लट्लकारः (आत्मनेपदम्) (to sit)~~

~~आस्ये – अस् धातुः, भावकर्मणोः लङ्लकारः (आत्मनेपदम्) (to throw, to be disappointed)~~

प्राप्तं – having obtained, received

प्रारब्ध – beginning, begun, commenced

प्रारब्ध (-ब्धः-ब्धा-ब्धं) प्र + आङ् + रभ् , क्त

कर्मणा – through action

कर्मणा - कर्मन् शब्द, तृतीया एक

कोऽपि = क उ अपि = क: अपि उकार विसर्ग सम्धि: + गुण स्वरसन्धि:

कोऽपि – whosoever it might be

समासा:

परिशिष्टाखण्डवस्तुपरतन्त्रः

प्रारब्धकर्मणा

निन्दति किमपि न योगी नन्दति नैवापरं किमप्यन्तः । चन्दनशीतलहृदयः कन्दलितानन्दमन्थरः स्वास्ते ॥ ४१॥

अन्वय:

योगी, किमपि न निन्दति, नैवापरं किमप्यन्तः नन्दति। चन्दनशीतलहृदयः कन्दलितानन्दमन्थरः स्वास्ते ॥ ४१॥

One who has united, does not rejoice in anything, there being no second to anything inside. With a cool heart and mind like sandalwood, broad Bliss having budded, remains in the Self.

शब्दार्थ: विवरणं च

निन्दति किमपि न योगी नन्दति नैवापरं किमप्यन्तः ।

निन्दति किम् अपि न योगी नन्दति न-एव-अपरं किम्-अपि-अन्तः

निन्दति – To blame, censure, find fault with, revile, reproach, condemn

किम् अपि न – no one at all

योगी, [न्] पुंलिङ्गम्, योगः अस्त्यस्येति । योग +इनिः । योगयुक्तः

योगी – one who has achieved union

नन्दति - rejoice, be satisfied with

नैवापरं = न एव अपरं

न-एव-अपरं – no other, no second, nothing higher

किमप्यन्तः - किम् अपि अन्त::

किम्-अपि-अन्तः – anything inside

चन्दनशीतलहृदयः कन्दलितानन्दमन्थरः स्वास्ते ॥ ४१॥

चन्दन-शीतल-हृदयः कन्दलित-आनन्द-मन्थरः स्व-आस्ते

चन्दन- sandal wood or perfume

चन्दन (पुं-नपुं) - गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियाम्। अर्थः – चन्दनः

शीतल- cool

शीतल (वि) - तुषारः शीतलः शीतो हिमः सप्तान्यलिङ्गकाः। अर्थः - शीतलद्रव्यम् cold substance

शीतल (पुं) - स्याद्वातकः शीतलोऽपराजिता शणपर्ण्यपि। अर्थः – शणपर्णी

हृदयः – mind & heart

हृदय (नपुं) - चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः - अर्थः – मनस् Mind

हृदय (नपुं) - बुक्काग्रमांसं हृदयं हृन्मेदस्तु वपा वसा। अर्थः – हृदयकमलम्

कन्दलित - Budded, blown, put forth, emitted.

कन्दलित (-तः-ता-तं) कन्दल a bud, इतच्

आनन्द - bliss

आनन्द (पुं) - स्यादानन्दथुरानन्दः शर्मशातसुखानि च। अर्थः – आनन्दः Joy

मन्थरः – large, broad, wide, or going slowly

मन्थर (पुं) - पुरोगमः पुरोगामी मन्दगामी तु मन्थरः। अर्थः – शनैर्गमनशीलः

स्वास्ते – स्व आस्ते

स्व-आस्ते – remains in oneself

<u>समासा:</u>

चन्दनशीतलहृदयः

कन्दलितानन्दमन्थरः

सन्त्यज्य शास्त्रजालं संव्यवहारं च सर्वतस्त्यक्त्वा । आश्रित्य पूर्णपदवीमास्ते निष्कम्पदीपवद्योगी ॥४२॥

<u>अन्वय:</u>

योगी, शास्त्रजालं सन्त्यज्य, संव्यवहारं च सर्वतस्त्यक्त्वा, पूर्णपदवीम् आश्रित्य निष्कम्पदीपवद् आस्ते ॥४२॥

One who has attained Union, having completely discarded the net of scriptures, discarding duties and trades everywhere, taking refuge in Completeness, sits like an unwavering lamp.

<u>शब्दार्थ: विवरणं च</u>

सन्त्यज्य शास्त्रजालं संव्यवहारं च सर्वतस्त्यक्त्वा

सन्त्यज्य शास्त्रजालं संव्यवहारं च सर्वतः-त्यक्त्वा

सन्त्यज्य = सम् + त्यज्य अनुनासिक सन्धिः

सन्त्यज्य – having abandoned

सन्त्यज्य – सम् + त्यज् + ल्यप्

शास्त्रजालं – net of scriptures, assemblage of tools

शास्त्र (नपुं) - निदेशग्रन्थयोः शास्त्रं शस्त्रमायुधलोहयोः। अर्थः – आज्ञा, ग्रन्थम्

संव्यवहारं च – and all duty, calling, trade

व्यवहार (पुं) - विवादो व्यवहारः स्यादुपन्यासस्तु वाङ्मुखम्। अर्थः – ऋणादिन्यायः

सर्वतस्त्यक्त्वा – सर्वत: + त्यक्त्वा   विसर्ग सकार सनधि:

सर्वत: - from all around, separate from all around

सर्वत:- सर्व् + तसिल्, अव्यय

त्यक्त्वा - having discarded

त्यक्त्वा – त्यज् + क्त्वा

आश्रित्य पूर्णपदवीमास्ते निष्कम्पदीपवद्योगी

आश्रित्य पूर्णपदवीम-आस्ते निष्कम्प-दीपवद्-योगी

आश्रित्य – having taken refuge, inhabiting

आश्रित्य - आङ् + श्रि + क्त + ल्यप्

पूर्णपदवीम – place/road/state of completeness

पदवी - स्त्री - पद् + ङीष्

पदवी (स्त्री) - अयनम्वर्त्म मार्गाध्वपन्थानः पदवी सृतिः। अर्थः – मार्गः

आस्ते – dwells, sits, abides

निष्कम्पदीपवद्योगी = निष्कम्पदीपवद् योगी = निष्कम्पदीपवत् योगी

निष्कम्प दीपवत् - like an unwavering lamp

कम्प (पुं) - कम्पोऽथ क्षण उद्धर्षो मह उद्धव उत्सवः। अर्थः – कम्पः

दीपवत् – नपुँ, वतुप्

योगी – one who has acheived union

योगी - योग +इनिः

समासा:

शास्त्रजालं

पूर्णपदवीम्

निष्कम्पदीपवत्

तृणपङ्कचर्चिताङ्गस्तृणमिव विश्वं विलोकयन्योगी । विहरति रहसि वनान्ते विजरामरभूम्नि विश्रान्तः ॥ ४३॥

अन्वय:

तृणपङ्कचर्चिताङ्ग: विश्रान्तः योगी विश्वं तृणमिव विलोकयन्, विजरामरभूम्नि रहसि वनान्ते विहरति ॥ ४३॥

With limbs covered with grass and dirt, a relaxed Yogi, viewing the universe similar to a commmon blade of grass, wandering secretly in a land without old age or death, at the end of the forest,.

शब्दार्थ: विवरणं च

तृणपङ्कचर्चिताङ्गस्तृणमिव विश्वं विलोकयन्योगी

तृणपङ्क-चर्चित-अङ्ग:-तृणम्-इव विश्वं विलोकयन्-योगी

तृणपङ्कचर्चिताङ्गस्तृणमिव = तृणपङ्कचर्चिताङ्ग: तृणमिव (तृणम् इव) सकार विसर्गसन्धि:

तृणपङ्क- grass and dirt

तृण (नपुं) - नडादयस्तृणं गर्मुच्छ्यामाकप्रमुखा अपि। अर्थः - तृणम्

तृण (नपुं) - शष्पं बालतृणम्घासो यवसं तृणमर्जुनम्। अर्थः – तृणम्

चर्चित- smeared, covered with

चर्चित - चर्चा + इतच् , (or चर्च धातु: + क्त ?)

चर्चा (स्त्री) - चित्ताभोगो मनस्कारश्चर्चा संख्या विचारणा। अर्थः - विचारणम्

चर्चा (स्त्री) - स्नानं चर्चा तु चार्चिक्यं स्थासकोऽथ प्रबोधनम्। अर्थः - चन्दनादिना देहविलेपनम्

अङ्ग:- limbs

अङ्ग (नपुं) - अङ्गं प्रतीकोऽवयवोऽपघनोऽथ कलेवरम्। अर्थः - देहावयवः

अङ्ग (अव्य) - स्युः प्याट्पाडङ्ग हे है भोः समया निकषा हिरुक्। अर्थः - सम्बोधनार्थकः

अङ्ग (अव्य) - पुनरर्थेऽङ्ग निन्दायां दुष्ठु सुष्ठु प्रशंसने। अर्थः – पुनरर्थः

तृणम्-इव – like grass

विश्वं - world

विश्व (नपुं) - आदित्यविश्ववसवस्तुषिता भास्वरानिलाः। अर्थः – गणदेवता class of devas

विश्व (स्त्री-नपुं) - स्त्रीनपुंसकयोर्विश्वं नागरं विश्वभेषजम्। अर्थः - शुण्ठी

विश्व (नपुं) - विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम्। अर्थः – समग्रम्

विलोकयन् – considering, inspecting

योगी – one who has achieved union

विहरति रहसि वनान्ते विजरामरभूम्नि विश्रान्तः

विहरति रहसि वन-अन्ते विजरामरभूम्नि विश्रान्तः

विहरति – plays, enjoys

रहसि – in secret

रहस् [नपुंसकम्] ; प्रथमा रहः रहसी रहांसि

वनान्ते = वन अन्ते सवर्णदीर्घ स्वरसन्धि:

वन-अन्ते – at the end (deep inside) a forest

वन (नपुं) - पयः कीलालममृतं जीवनं भुवनं वनम्। अर्थः - जलम्

वन (नपुं) - अटव्यरण्यं विपिनं गहनं काननं वनम्। अर्थः – वनम्

अन्त (पुं) - अन्तो नाशो द्वयोर्मृत्युर्मरणं निधनोऽस्त्रियाम्। अर्थः - मरणम्

अन्त (पुं-नपुं) - अन्तो जघन्यं चरममन्त्यपाश्चात्यपश्चिमाः। अर्थः – अन्त्यम्

विजरामर – without old age or death

भूम्नि – on earth

भूम्नि - भूमन् शब्दः, सप्तमी एक ; प्रथमा – भूम भूम्नी/भूमनी भूमानि

विश्रान्तः – relaxed

समासा:

तृणपङ्कचर्चिताङ्गः

विजरामरभूम्नि

पश्यति किमपि न रूपं न वदति न श्रृणोति किञ्चिदपि वचनम्। तिष्ठति निरुपमभूमनि निष्ठामवलम्ब्य काष्ठवद्योगी ॥४४॥

अन्वय:

योगी, किमपि रूपं न पश्यति, किञ्चिदपि वचनम् न वदति न श्रृणोति, निरुपमभूमनि निष्ठामवलम्ब्य काष्ठवत् तिष्ठति ॥४४॥

The United One does not see any form, nor any words does he speak or hear. In an world without compare, receiving support in Established Firmness, stands like a piece of wood.

शब्दार्थ: विवरणं च

पश्यति किमपि न रूपं न वदति न श्रृणोति किञ्चिदपि वचनम्

पश्यति – watches, sees

किमपि न – not any thing at all

रूपं – form, shape

रूप (नपुं) - रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी। अर्थः – नेत्रेन्द्रियविषयः

न वदति – not speaking

न श्रृणोति – not listening

किञ्चिदपि = किञ्चिद् अपि = किञ्चित् अपि   जश्त्व व्यञ्जन सन्धिः।

किञ्चिदपि – any at all

वचनम् – speech, words

वचन (नपुं) - व्याहार उक्तिर्लपितं भाषितं वचनं वचः। अर्थः – वचनम्

तिष्ठति निरुपमभूमनि निष्ठामवलम्ब्य काष्ठवद्योगी

तिष्ठति – stays

निरुपम भूमनि – in/on incomparable land/world

उपमा (स्त्री) - प्रतिकृतिरर्चा पुंसि प्रतिनिधिरुपमोपमानं स्यात्। अर्थः – उपमा

भूमनि - भूमन् शब्दः, सप्तमी एकः भूम्नि/भूमनि

निष्ठाम् – established firmness

अवलम्ब्य – having received support from

काष्ठवद्योगी = काष्ठवद् योगी = काष्ठवत् योगी

काष्ठवत् योगी – like a log of wood, the yogi

काष्ठवत् – वतुप् प्रत्यय, नपुँ

काष्ठ (नपुं) - काष्ठं दार्विन्धनं त्वेध इध्ममेधः समित्स्त्रियाम्। अर्थः – काष्ठम्

समासा:

निरुपमभूमनि

जात्यभिमानविहीनो जन्तुषु सर्वत्र पूर्णतां पश्यन् । गूढं चरति यतीन्द्रो मूढवदखिलागमार्थतत्त्वज्ञः ॥ ४५॥

अन्वय:

यतीन्द्रो अखिलागमार्थतत्त्वज्ञः जात्यभिमानविहीनो , जन्तुषु सर्वत्र पूर्णतां पश्यन् , मूढवद् गूढं चरति ॥ ४५॥

The King of Ascetics, knowing the essence of all scriptural goals, characteristically devoid of pride, sees Completeness (Unity) in beings everywhere, moves secretly, appearing to be a fool.

शब्दार्थ: विवरणं च

जात्यभिमानविहीनो जन्तुषु सर्वत्र पूर्णतां पश्यन्

जाति-अभिमान-विहीनो जन्तुषु सर्वत्र पूर्णतां पश्यन्

जात्यभिमानविहीनो जन्तुषु = जात्यभिमानविहीन: जन्तुषु

जात्यभिमानविहीन: = जाति + अभिमानहीन:

जाति – kind, sort, species, lineage

जाति (स्त्री) - जातिर्जातं च सामान्यं व्यक्तिस्तु पृथगात्मता। अर्थः - घटत्वादिजातिःA kind of thing

जाति (स्त्री) - सुमना मालती जातिः सप्तला नवमालिका। अर्थः - मालती

जाति (स्त्री) - आर्तिः पीडा धनुष्कोट्योर्जातिः सामान्यजन्मनोः। अर्थः – जननम्, सामान्यम्

अभिमान – pride, haughtiness

अभिमान (पुं) - गर्वोऽभिमानोऽहङ्कारो मानश्चित्तसमुन्नतिः। अर्थः - अहङ्कारः

अभिमान (पुं) - अभिमानोऽर्थादिदर्पे ज्ञाने प्रणयहिंसयोः। अर्थः - अर्थादिदर्पाज्ञानम्, हिंसा, प्रणयम्

विहीनो – abandoned, deprived, deserted

जन्तुषु – animal, creature

जन्तु (पुं) - प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः। अर्थः – प्राणी, A being

सर्वत्र - everywhere

पूर्णतां – completeness, fullness

पूर्णता – तल् भाववाचक् प्रत्यय

पश्यन् – seeing

गूढं चरति यतीन्द्रो मूढवदखिलागमार्थतत्त्वज्ञः

गूढं चरति यति-इन्द्रो मूढवद्-अखिल-आगम-अर्थ-तत्त्वज्ञः

गूढं – hidden, concealed

गूढ (विं) - निदिग्धोपचिते गूढगुप्ते गुण्ठितरूषिते। अर्थः – कृतगोपनः

चरति – wanders, walks

यति-इन्द्रो – king of ascetics

यतीन्द्रो = यति + इन्द्रः = = यतिः + इन्द्रः

यति + इन्द्रः = = यतिः + इन्द्रः

इन्द्र (पुं) - इन्द्रो मरुत्वान् मघवा बिडौजाः पाकशासनः। अर्थः - इन्द्रः

इन्द्र (पुं) - इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत्। अर्थः - पूर्वदिशायाः स्वामी

मूढवदखिलागमार्थतत्त्वज्ञः = मूढवदखिल आगम अर्थतत्त्वज्ञः

मूढवद्- - like an idiot

मूढवद् = मूढवत् – वतुप्

मूढ (विं) - अज्ञे मूढयथाजातमूर्खवैधेयबालिशाः। अर्थः – मूर्खः

अखिल- all

आगम-अर्थ – purpose of shastras

तत्त्वज्ञः – knower of subtle nature

तत्त्व (नपुं) - विलम्बितं द्रुतं मध्यं तत्त्वमोघो घनं क्रमात्। अर्थः – विलम्बितनृत्यगीतवाद्यम्

समासा:

जात्यभिमानविहीनो

अखिलागमार्थतत्त्वज्ञः

उपधाय बाहुमूलं परिधायाकाशमवनिमास्तीर्य । प्रस्वपिति विरतिवनितां परिरभ्यानन्दपरवशः कोऽपि ॥ ४६॥

अन्वय:

कोऽपि बाहुमूलं उपधाय, आकाशम् परिधाय, अवनिम् आस्तीर्य, विरतिवनितां परिरभ्य, आनन्द-परवशः प्रस्वपिति॥ ४६॥

Someone unique, resting on his armpit, having wrapped the sky as a garment over the earth, (sky is the blanket, earth is the bed), embracing detachment as his wife, under the supreme influence of Bliss,. falls asleep

शब्दार्थ: विवरणं च

उपधाय बाहुमूलं परिधायाकाशमवनिमास्तीर्य

उपधाय बाहुमूलं परिधाय-आकाशम्-अवनिम् आस्तीर्य

उपधाय – having placed near or upon, taking up, together with

उपाधाय – अव्ययं indeclinable

बाहुमूलं - armpit

परिधायाकाशम् = परिधायः आकाशम्   विसर्ग लोपः + सवर्णदीर्घ स्वरसन्धिः

परिधाय – garment, wrap

परि circling surrounding, धा to have, घञ् Affix. and युक

आकाशम् – sky, heavens

अवनिम्- earth

आस्तीर्य – having spread, covered

प्रस्वपिति विरतिवनितां परिरभ्यानन्दपरवशः कोऽपि

प्रस्वपिति विरति-वनितां परिरभ्य-आनन्द-परवशः कोऽपि

प्रस्वपिति – falls asleep

विरति - rests, pauses, ceases, discontinues, Indifference to worldly attachments

वनितां – beloved woman, wife

परिरभ्यानन्द = परिरभ्य आनन्द   सवर्णदीर्घ स्वरसन्धिः ।

परिरभ्य – having embraced

आनन्द – bliss

परवशः – subservient to (bliss)

कोऽपि = क उ अपि = कः अपि   उकार विसर्ग सम्धिः + गुण स्वरसन्धिंः

कोऽपि – some one unique

<u>समासाः</u>

बाहुमूलं

आनन्दपरवशः

गतभेदवासनाभिः स्वप्रज्ञोदारवारनारीभिः । रमते सह यतिराजस्त्रय्यन्तान्तःपुरे कोऽपि ॥४७॥

<u>अन्वयः</u>

कोऽपि यतिराजः गतभेदवासनाभिः स्वप्रज्ञोदारवारनारीभिः सह त्रय्यन्तान्तःपुरे रमते ॥४७॥

Some Unique King of Ascetics, having dispatched with differences and tendencies, together with women that are Self-knowledge and much generosity, enjoys in inner rooms that are the finale of the three vedas (Upanishads).

<u>शब्दार्थः विवरणं च</u>

गतभेदवासनाभिः स्वप्रज्ञोदारवारनारीभिः

गत-भेद-वासनाभिः स्वप्रज्ञः-उदारवार-नारीभिः

गत-भेद-वासनाभिः – gone are all differentiations and latent tendencies

भेद (पुं) - भेदो दण्डः साम दानमित्युपायचतुष्टयम्। अर्थः - उपायाः

भेद (पुं) - भेदोपजापावुपधा धर्माद्यैर्यत्परीक्षणम्। अर्थः – भेदः

स्वप्रज्ञोदारवारनारीभिः = स्वप्रज्ञ उदारवारनारीभिः = स्वप्रज्ञः उदारवारनारीभिः लोपः विसर्ग सन्धिः + गुण स्वरसन्धिः

स्वप्रज्ञः- wise/knowledgeable about oneself

उदार- boundless generosity

उदार (विं) - दक्षिणे सरलोदारौ सुकलो दातृभोक्तरि। अर्थः - उदारमनः

उदार (विं) - उदारो दातृमहतोरितरस्त्वन्यनीचयोः। अर्थः – महत्, धाता

वार -That which covers, a cover. A multitude, large number. A heap, quantity. A herd, flock . A day of the week. Time, turn. An occasion, opportunity. A door, gate. The opposite bank of a river.

नारीभिः – by/with women

नारी (स्त्री) - स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः। अर्थः – स्त्री

रमते सह यतिराजस्त्रय्यन्तान्तःपुरे कोऽपि

रमते सह यतिराजः-त्रय्यन्त-अन्तःपुरे कोऽपि

रमते - revels

सह – together with

सह (अव्य) - कदाचिज्जातु सार्धं तु साकं सत्रा समं सह। अर्थः – सह

यतिराजस्त्रय्यन्तान्तःपुरे = यतिराजः त्रय्यन्तान्तःपुरे सकार विसर्ग सन्धिः

यतिराजः- king of ascetics

त्रय्यन्तान्तःपुरे = त्रय्यन्त अन्तःपुरे सवर्ण दीर्घ स्वरसन्धिः

त्रय्यन्त = त्रयी + अन्त यण स्वर सन्धिः

त्रय्यन्त – end portion of three (vedas), Vedanta

त्रयी (स्त्री) - श्रुतिः स्त्री वेद आम्नायस्त्रयी धर्मस्तु तद्विधिः। अर्थः - वेदः

त्रयी (स्त्री) - स्त्रियामृक्सामयजुषी इति वेदास्त्रयस्त्रयी। अर्थः - ऋग्यजुस्साम-वेदाः

अन्त (पुं) - अन्तो नाशो द्वयोर्मृत्युर्मरणं निधनोऽस्त्रियाम्। अर्थः - मरणम्

अन्त (पुं-नपुं) - अन्तो जघन्यं चरममन्त्यपाश्चात्यपश्चिमाः। अर्थः – अन्त्यम्

अन्तःपुरे = अन्तः पुरे उपध्मानीय विसर्गसन्धिः

अन्तःपुरे – inner chambers

कोऽपि = क उ अपि = कः अपि उकारः विसर्ग सन्धिः + गुण स्वरसन्धिः + पूर्वरूप स्वर सन्धिः

कोऽपि = को अपि पूर्वरूप स्वर सन्धिः

को अपि = क उ अपि गुण स्वरसन्धिः

क उ अपि = कः अपि उकारः विसर्ग सन्धिः

कोऽपि – whoever, someone unique

<u>समासाः</u>

यतिराजः

गतभेदवासनाभिः

स्वप्रज्ञोदारवारनारीभिः

यतिराजस्त्रय्यन्तान्तःपुरे

वैराग्यविपुलमार्गं विज्ञानोद्दामदीपिकोद्दीप्तम् । आरुह्य तत्त्वहर्म्यं मुक्त्या सह मोदते यतिराट् ॥४८॥

अन्वय:
यतिराट्, वैराग्यविपुलमार्गं, विज्ञानोद्दामदीपिकोद्दीप्तम्, तत्त्वहर्म्यं आरुह्य मुक्त्या सह मोदते ॥४८॥

The King of Ascetics, revels with Liberation, having ascended the broad road of dispassion, well lit by Supreme Knowledge as the powerful torch, to the mansion of his true essential nature

शब्दार्थ: विवरणं च
वैराग्यविपुलमार्गं विज्ञानोद्दामदीपिकोद्दीप्तम्
वैराग्य-विपुल-मार्गं विज्ञान-उद्दाम-दीपिका-उद्दीप्तम्

वैराग्य – dispassion, absence of worldly desires, indifference

विपुल- Large, capacious, broad, spacious

विपुल (वि) - वड्ढोरुविपुलं पीनपीव्नी तु स्थूलपीवरे। अर्थः – विस्तृतम्

मार्गं – road, way,

मार्ग (पुं) - मार्गशीर्षे सहा मार्ग आग्रहायणिकश्च सः । अर्थः - मार्गशीर्षामासः

मार्ग (पुं) - अयनम्वर्त्म मार्गाध्वपन्थानः पदवी सृतिः। अर्थः – मार्गः

विज्ञानोद्दामदीपिकोद्दीप्तम् = विज्ञान उद्दामदीपिका उद्दीप्तम् गुण स्वरसन्धिः

विज्ञान- Knowledge, wisdom, intelligence, understanding

विज्ञान (नपुं) - मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः। अर्थः – शिल्पादिविषयकबुद्धिः

उद्दाम- Unbound, unrestrained, unchecked, free, bold, powerful, self-willed

दामन् (स्त्री-नपुं) - न पुंसि दाम सन्दानं पशुरज्जुस्तु दामनी। अर्थः - दोहनकाले पादबन्धनरज्जुः, पशुबन्धनरज्जुः

दीपिका- light, torch, elucidator

उद्दीप्तम् – lighted, shining, bright

उद्दीप्तः - उत् + दीप + क्त

आरुह्य तत्त्वहर्म्यं मुक्त्या सह मोदते यतिराट्
आरुह्य तत्त्व-हर्म्यं मुक्त्या सह मोदते यतिराट्

आरुह्य - ascended

तत्त्व- truth, reality, essential nature

तत्त्व - त(त्व)त्त्वं, क्लीबम्

तत्त्व (नपुं) - विलम्बितं द्रुतं मध्यं तत्त्वमोघो घनं क्रमात्। अर्थः – विलम्बितनृत्यगीतवाद्यम्

हर्म्यं – palace, mansion

हर्म्यम् - [हृ-यत् मुट् च]

मुक्त्या – liberation

सह - with

सह (अव्य) - कदाचिज्जातु सार्धं तु साकं सत्रा समं सह। अर्थः - सह

मोदते - enjoys

यतिराट् – king of ascetics

समासा:

वैराग्यविपुलमार्गं

विज्ञानोद्दामदीपिकोद्दीप्तम्

तत्त्वहर्म्यं

यतिराट्

विजनतलोत्पलमालां वनितावैतृष्ण्यकल्पवल्लीं च । अपमानामृतगुटिकामात्मज्ञः कोऽपि गृह्णाति ॥ ४१ ॥

अन्वय:

कोऽपि विजनतल: आत्मज्ञः उत्पलमालां वनितावैतृष्ण्यकल्पवल्लीं अपमानामृतगुटिकाम् च गृह्णाति ॥ ४१ ॥

Someone unique, in solitary places, who has realized the Atma, grasps dishonour as a small ball of immortal nectar, grasps a garland of blue lotuses as wish-yielding creeper for quenching desire towards women.

(MIS) - The knower of the self wears a garland of lotuses in the form of places unfrequented by people, is adorned by the wish-yielding creeper in the form of detachment towards women, and consumes the pill of nectar in the form of dishonour (by the ignorant). (The idea is that he stays only in deserted places, is not at all attracted by sensual pleasures and welcom

शब्दार्थ: विवरणं च

विजनतलोत्पलमालां वनितावैतृष्ण्यकल्पवल्लीं च

विजनतल-उत्पल-मालां वनिता-वैतृष्ण्य-कल्प-वल्लीं च

विजनतलोत्पलमालां = विजनतल उत्पलमालां = विजनतल: उत्पलमालां गुण स्वरसन्धि: +विसर्ग लोप सन्धि:

विजनतल – under/full-of private, lonely, solitary

विजन (वि) - विविक्तविजनच्छन्ननिःशलाकास्तथा रहः। अर्थः – विजनः

उत्पल - emaciated, lean

उत्पलं - blue lotus

उत्पल (नपुं) - स्यादुत्पलं कुवलयमथ नीलाम्बुजन्म च। अर्थः - कुवलयम्

उत्पल (नपुं) - व्याधिः कुष्टं पारिभाव्यं वाप्यं पाकलमुत्पलम्। अर्थः – कुष्ठः

मालां – garland, row, line

माला (स्त्री) - माल्यं मालास्रजौ मूर्ध्नि केशमध्ये तु गर्भकः। अर्थः – मूर्ध्निधृतकुसुमावलिः

वनिता – woman, wife, mistress

वनिता (स्त्री) - प्रतीपदर्शिनी वामा वनिता महिला तथा। अर्थः - स्त्री

वनिता (स्त्री) - वनिता जनितात्यर्थानुरागायां च योषिति। अर्थः – जनितात्यर्थानुरागा

वैतृष्ण्य – quenching of thirst, freedom from desire

कल्प – practicable, feasible,

कल्प (पुं) - दैवे युगसहस्त्रे द्वे ब्राह्मः कल्पौ तु तौ नृणाम्। अर्थः - दैवम् युगसहस्त्रद्वयम्

कल्प (पुं) - संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि। अर्थः - प्रलयः

कल्प (पुं) - ध्यानयोगासने ब्रह्मासनं कल्पे विधिक्रमौ। अर्थः - विधानशास्त्रम्

कल्प (पुं) - अभ्रेषन्यायकल्पास्तु देशरूपं समञ्जसम्। अर्थः – नीतिः

वल्लीं च – creeping plant

वल्ली (स्त्री) - अप्रकाण्डे स्तम्बगुल्मौ वल्ली तु व्रततिर्लता। अर्थः – लता

अपमानामृतगुटिकामात्मज्ञः कोऽपि गृह्णाति

अपमान-अमृत-गुटिकाम-आत्मज्ञः कोऽपि गृह्णाति

अपमानामृतगुटिकामात्मज्ञः = अपमान अमृतघुटिकाम् आत्मज्ञः सवर्ण दीर्घ स्वरसन्धिः

अपमान – disrespect, dishonor, disgrace

अमृतगुटिका A small water jar of nectar

आत्मज्ञः – knower of Atma

अमृत – not dead, immortal

अमृत (नपुं) - स्यात्सुधर्मा देवसभा पीयूषममृतं सुधा। अर्थः - अमृतम्

अमृत (नपुं) - मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम्। अर्थः - मोक्षः

अमृत (नपुं) - पयः कीलालममृतं जीवनं भुवनं वनम्। अर्थः - जलम्

अमृत (नपुं) - अमृतं विघसो यज्ञशेषभोजनशेषयोः। अर्थः - यज्ञशेषः

अमृत (नपुं) - द्वे याचितायाचितयोर्यथासंख्यं मृतामृते। अर्थः – अयाचितः

~~घुटिका (स्त्री) - तद्ग्रन्थी घुटिके गुल्फौ पुमान्पार्ष्णिस्तयोरधः। अर्थः – पादग्रन्थी~~

गुटिका - A pill, A round pebble, any small globe or ball, cocoon of the silk worm, a pearl

कोऽपि - whoever

गृह्णाति – grasps

<u>समासा:</u>

आत्मज्ञः

अपमानामृतगुटिकाम्

उत्पलमालां

वनितावैतृष्ण्यकल्पवल्लीं

न निषेधति दोषधिया गुणबुद्ध्या वा न किञ्चिदादत्ते । आविद्यकमखिलमिति ज्ञात्वोदास्ते मुनिः कोऽपि ॥ ५० ॥

अन्वय:
कोऽपि मुनिः, दोषधिया न निषेधति, किञ्चित् वा गुणबुद्ध्या न आदत्ते, आविद्यकमखिलमिति ज्ञात्वोदास्ते ॥ ५० ॥

Some unique, silent sage, does not mentally forbid faults, nor is attracted mentally even a little to merits, is indifferent knowing all to be a creation of Nescience.

शब्दार्थ: विवरणं च
न निषेधति दोषधिया गुणबुद्ध्या वा न किञ्चिदादत्ते
न निषेधति दोष-धिया गुण-बुद्ध्या वा न किञ्चिद्-आदत्ते
न निषेधति – does not forbid
दोष-धिया – faults mentally
दोष (पुं) - दोषो वातादिके दोषा रात्रौ दक्षोऽपि कुक्कुटे। अर्थः – वातादयः
धिया – धी शब्दः, तृतीया एक
धी (स्त्री), बुद्धि (स्त्री) - बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः। अर्थः – बुद्धिः, Intellect
गुण-बुद्ध्या वा – merits intellectually
किञ्चिदादत्ते = किञ्चिद् आदत्ते = किञ्चित् आदत्ते जश्त्व व्यञ्जनसन्धिः
न किञ्चिद्- not any
आदत्ते - Taken, received, agreed to, undertaken, attracted.
आदत्त (-त्तः-त्ता-त्तं) आङ् + दा + क्त

आविद्यकमखिलमिति ज्ञात्वोदास्ते मुनिः कोऽपि
आविद्यकम्-अखिलम्-इति ज्ञात्वा-उदास्ते मुनिः कोऽपि
आविद्यकम् – created by avidya, nescience
अविद्यायाः आगतः = अविद्या + वुञ् --> अविद्या + अक --> आविद्यक । आविद्यक is something that comes from अविद्या.
वुञ्-प्रत्यय, विद्यायोनिसम्बन्धेभ्यः वुञ्, to express the meaning of ततः आगतः ।
अखिलम् - everything
अखिल (वि) - विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम्। अर्थः – समग्रम्
इति – it is so
ज्ञात्वोदास्ते = ज्ञात्वा उदास्ते गुण स्वरसन्धिः
ज्ञात्वा – having known
उदास्ते – is indifferent, sits unconcerned
उदास्ते – उत् + आस्ते
मुनिः – quiet sage
मुनि (पुं) - मुनीन्द्रः श्रीघनः शास्ता मुनिः शाक्यमुनिस्तु यः। अर्थः – बुद्धः, buddha
मुनि (पुं) - तपस्वी तापसः पारिकाङ्क्षी वाचंयमो मुनिः। अर्थः – मौनव्रतिः
कोऽपि = क उ अपि = कः अपि उकार विसर्गसन्धिः + गुण स्वरसन्धिः + पूर्वरूप स्वरसन्धिः

कोऽपि – someone special

समासा:
दोषधिया
गुणबुद्ध्या

भूतं किमपि न मनुते भावि च किञ्चिन्नचिन्तयत्यन्तः । पश्यति न पुरोवर्त्यपि वस्तु समस्तार्थसमरसः कोऽपि ॥५१॥

अन्वय:
कोऽपि समस्तार्थसमरसः, भूतं भावि च किमपि न मनुते, किञ्चिन्नचिन्तयत्यन्तः, पुरोवर्त्यपि वस्तु न पश्यति ॥५१॥
Someone unique, who is equanimous (sees oneness and Bliss) to all aims (results), does not think about (does not esteem) whatever has happened or must/will happen in future, does not worry about any ending (deaths), does not see (distinguish) an object even if it is in front.

शब्दार्थ: विवरणं च
भूतं किमपि न मनुते भावि च किञ्चिन्नचिन्तयत्यन्तः
भूतं किम्-अपि न मनुते भावि च किञ्चित्-न-चिन्तयति-अन्तः
भूतं - become, happened, past, created
भूतं = भू + क्तः, नपुँ
भूत (नपुं) - पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः। अर्थः - देवयोनिः
भूत (वि) - लब्धं प्राप्तं विन्नं भावितमासादितं च भूतं च। अर्थः - प्राप्तम्
भूत (नपुं) - युक्ते क्ष्मादावृते भूतं प्राण्यतीते समे त्रिषु। अर्थः - आवृतम्, अतीतः, भूमिः, प्राणी, युक्तम्
किम्-अपि – whatever it may be
न मनुते – does not think about or learn about, does not esteem
मनुते – मन् धातु
भावि च – what must happen or will take place in future
भावि – भाविन् शब्द
किञ्चिन्नचिन्तयत्यन्तः – किञ्चित् न चिन्तयत्यन्तः
किञ्चित्-न- not anything
चिन्तयत्यन्तः - चिन्तयति अन्तः यण स्वरसन्धिः
चिन्तयति- thinks, consideres, ponders, takes care of
चिन्तयति – चिन्त् धातु, उभयपदी
अन्तः – last, end, death
अन्त (पुं) - अन्तो नाशो द्वयोर्मृत्युर्मरणं निधनोऽस्त्रियाम्। अर्थः - मरणम्
अन्त (पुं-नपुं) - अन्तो जघन्यं चरममन्त्यपाश्चात्यपश्चिमाः। अर्थः – अन्त्यम्

पश्यति न पुरोवर्त्यपि वस्तु समस्तार्थसमरसः कोऽपि

पश्यति न पुरोवर्ति-अपि वस्तु समस्त-अर्थ-सम-रसः कोऽपि

पश्यति न – does not see

पश्यति – दृश् धातु

पुरोवर्त्यपि – पुरोवर्ति अपि यण स्वरसन्धि:

पुरो-वर्ति-अपि even if being/existing in front of – wrapped around or spread the earth

पुर (पुं) - स्थानीयं निगमोऽन्यत्तु यन्मूलनगरात्पुरम्। अर्थः - मूलनगरादन्यनगरम्

पुर (पुं) - कुम्भोलूखलकं क्लीबे कौशिको गुग्गुलुः पुरः। अर्थः - गुग्गुलुवृक्षः

पुर (नपुं) - पुरोऽधिकमुपर्यग्राण्यगारे नगरे पुरम्। अर्थः - गृहम्

पुर (नपुं) - पुरोऽधिकमुपर्यग्राण्यगारे नगरे पुरम्। अर्थः - नगरम्

पुर (अव्य) - अतर्किते तु सहसा स्यात्पुरः पुरतोऽग्रतः। अर्थः – अग्रे

वर्ति (स्त्री) - गात्रानुलेपनी वर्तिर्वर्णकं स्याद्विलेपनम्। अर्थः – गात्रानुलेपयोग्यसुगन्धिद्रव्यम्

वस्तु – thing, object

समस्तार्थसमरसः -समस्त अर्थसमरसः सवर्ण दीर्घ स्वरसन्धि:

समस्त-अर्थ – all goals, ends, aims, meaning

सम-रसः – equal taste, equal essence

सम (वि) - वाच्यलिङ्गाः समस्तुल्यः सदृक्षः सदृशः सदृक्। अर्थः - सदृशः

सम (वि) - गणनीये तु गणेयं संख्याते गणितमथ समं सर्वम्। अर्थः - समग्रम्

सम (अव्य) - कदाचिज्जातु सार्धं तु साकं सत्रा समं सह। अर्थः - सह

रस (पुं) - रूपं शब्दो गन्धरसस्पर्शाश्च। अर्थः - रसनेन्द्रियविषयः

रस (पुं) - क्षारः काचोऽथ चपलो रसः सूतश्च पारदे। अर्थः - पारदः

रस (पुं) - वोलगन्धरसप्राणपिण्डगोपरसाः समाः। अर्थः - गन्धरसः

रस (पुं) - श्रृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः। अर्थः - गुणः, रागः, श्रृङ्गारादिः, विषम्, वीर्यम्, द्रवः

कोऽपि = क उ अपि = क: अपि उकार विसर्गसन्धि: + गुण स्वरसन्धी: + पूर्वरूप स्वरसन्धि:

कोऽपि – whoever it might be

<u>समासा:</u>

पुरोवर्ति

समरसः

निगृहीताखिलकरणो निर्मृष्टाशेषविषयेहः । तृप्तिमनुत्तमसीमां प्राप्तः पर्यटति कोऽपि यतिवर्यः ॥ ५२॥

<u>अन्वय:</u>

कोऽपि यतिवर्यः निगृहीताखिलकरणो निर्मृष्टाशेषविषयेहः तृप्तिमनुत्तमसीमां प्राप्तः पर्यटति ॥ ५२॥

Someone unique, select among sages with controlled passion, having curbed the field of action in its entirety, having wiped away the world of objects here without remnant, having attained incomparable limitless satiation, wanders about.

<u>शब्दार्थ: विवरणं च</u>

निगृहीताखिलकरणो निर्मृष्टाशेषविषयेहः

निगृहीत-अखिल-करणो निर्मृष्ट-अशेष-विषय-इहः

निगृहीताखिलकरणो = निगृहीत अखिलकरणो सवर्ण दीर्घ स्वरसन्धिः

निगृहीत – restrained, curbed, subdued

निगृहीत - नि+ग्रह् + क्तः

अखिल – entire, without gap or void

अखिल (वि) - विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम्। अर्थः – समग्रम्

करणो – making, doing, producing, or field of action (as in क्षेत्र-क्षेत्रज्ञ)

करण (पुं) - शूद्राविशोस्तु करणोऽम्बष्ठो वैश्याद्विजन्मनोः। अर्थः - वैश्याच्छूद्रायां जातः

करण (नपुं) - करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपि। अर्थः – साधकतमम्, क्षेत्रम्, देहः, इन्द्रियम्

निर्मृष्टाशेषविषयेह = निर्मृष्ट अशेषविषय इह सवर्ण दीर्घ स्वरसन्धिः, गुण स्वरसन्धिः

निर्मृष्ट – wiped away, rubbed out

निर्मृष्ट - निर् मृष्ट

मृष्ट (वि) - निर्णिक्तं शोधितं मृष्टं निःशोध्यमनवस्करम्। अर्थः – अपनीतमलम्

अशेष- without remnant

अशेष (वि) - विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम्। अर्थः – समग्रम्

विषय - matters

विषय (पुं) - रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी। अर्थः - विषयाः

विषय (पुं) - नीवृज्जनपदो देशविषयौ तूपवर्तनम्। अर्थः - ग्रामसमुदायलक्षणस्थानम्

विषय (पुं) - उत्कर्षोऽतिशये सन्धिः श्लेषे विषय आश्रये। अर्थः - आश्रयः

विषय (पुं) - विषयो यस्य यो ज्ञातस्तत्र शब्दादिकेष्वपि। अर्थः – शब्दादीन्द्रियम्, यस्य यत् ज्ञातः तत्

इह – here

तृप्तिमनुत्तमसीमां प्राप्तः पर्यटति कोऽपि यतिवर्यः

तृप्तिम्-अनुत्तम्-असीमां प्राप्तः पर्यटति कोऽपि यतिवर्यः

तृप्तिम् – satiated

तृप्ति (स्त्री) - सौहित्यं तर्पणं तृप्तिः फेला भुक्तसमुज्झितम्। अर्थः – तृप्तिः

अनुत्तम् –having no better, no superior

अनुत्तम (वि) - क्लीबे प्रधानं प्रमुखप्रवेकानुत्तमोत्तमाः। अर्थः – श्रेष्ठम्

असीमां – without border or limit

सीमा (स्त्री) - ग्रामान्तमुपशल्यं स्यात्सीमसीमे स्त्रियामुभे। अर्थः – सीमा

प्राप्तः – having obtained

प्राप्तः - प्र + आप् क्त

पर्यटति – roams, travels

कोऽपि उकार विसर्गसन्धिः + गुण स्वरसन्धिः + पूर्वरूप स्वरसन्धिः

कोऽपि – someone unique

यतिवर्यः – selected among sages with controlled passion (ascetics)

यति (पुं) - ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते। अर्थः – निर्जितेन्द्रिययतिः

वर्य (विं) - मुख्यवर्यवरेण्याश्च प्रवर्होऽनवराध्यर्वत्। अर्थः – श्रेष्ठम्

समासा:

निगृहीताखिलकरणो

निर्मृष्टाशेषविषयेहः

तृप्तिमनुत्तमसीमां

सन्त्यजति नोपपन्नं नासंपन्नं च वाञ्छति क्वापि । स्वस्थः शेते यतिराडान्तरमानन्दमनुभवन्नेकः ॥५३॥

अन्वय:

एकः यतिराट् स्वस्थः, उपपन्नं न सन्त्यजति, असंपन्नं च न वाञ्छति, आन्तरमानन्दमनुभवन् क्वापि शेते ॥५३॥

One, king of ascetics, stationed in the Self, does not discard what has been acquired, does not desire what is not acquired, experiencing innermost Bliss, lies down (relaxes) somewhere

शब्दार्थ: विवरणं च

संत्यजति नोपपन्नं नासंपन्नं च वाञ्छति क्वापि

संत्यजति न-उपपन्नं न-असंपन्नं च वाञ्चति को-अपि

नोपपन्नं = न उपपन्नं गुण स्वरसन्धि

न संत्यजति – (does) not discard completely

उपपन्नं – what is acquired

नासंपन्नं = न असंपन्नं सवर्ण दीर्घ स्वरसन्धिः

न-असंपन्नं – (does) not un-acquired

च वाञ्छति – desire or seek

क्वापि = क्व अपि सवर्ण दीर्घ स्वरसन्धिः

क्वापि – somewhere

क्वापि - अव्यय

स्वस्थः शेते यतिराडान्तरमानन्दमनुभवन्नेकः

स्व-स्थः शेते यतिराट्-अन्तरं-आनन्दम्-अनुभवन्-एकः

स्व-स्थः – stationed in own self

शेते – lies down

यतिराडान्तरमानन्दमनुभवन्नेकः = यतिराड् आन्तरमानन्दमनुभवन्नेकः सवर्ण दीर्घ स्वरसन्धिः

यतिराड् आन्तरमानन्दमनुभवन्नेकः = यतिराट् आन्तरमानन्दमनुभवन्नेकः जश्त्व व्यञ्जनसन्धिः

यतिराडान्तरमानन्दमनुभवन्नेकः = यतिराडान्तरमानन्दमनुभवन् एकः गुण स्वरसन्धि

यतिराट् - king of ascetics

आन्तरं – innermost, secret, hidden

अन्तर (नपुं) – अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये। अर्थः – अवकाशः, अवधिः, अवसरः, अन्तर्धानम्, अन्तरात्मा, आत्मीयम्, बहिः, बिलम्, भेदः, परिधानम्

आनन्दम् - delight

अनुभवन् - experiencing

एकः – one

समासा:

कामपि विमलां पदवीमासाद्यानन्दसंविदुन्निद्राम् । आस्ते भिक्षुक एको विहरन्निर्मुक्तबन्धनः स्वैरम् ॥५४॥

अन्वय:

एक: भिक्षुक निर्मुक्तबन्धनः, कामपि विमलां पदवीमासाद्य, आनन्दसंविदुन्निद्राम् स्वैरम् विहरन् आस्ते ॥५४॥

One mendicant, freed from bondage, having achieved some undefined blemishless status, relaxes/exists roaming of his own free will, awakened into the Bliss of Enlightenment

शब्दार्थ: विवरणं च

कामपि विमलां पदवीमासाद्यानन्दसंविदुन्निद्राम्

काम्-अपि विमलां पदवीम्-आसाद्य-आनन्द-संवित्-उन्निद्राम्

काम्-अपि – some unique, undefined

विमलां – spotless, pure

मल (पुं-नपुं) - तिलकं क्लोम मस्तिष्कं गोर्दं किट्टं मलोऽस्त्रियाम्। अर्थः - मलम्

मल (पुं-नपुं) - मलोऽस्त्री पापविट्किट्टान्यस्त्री शूलं रुगायुधम्। अर्थः – पापम्, पुराणकिट्टम्

पदवीमासाद्यानन्दसंविदुन्निद्राम् = पदवीमासाद्य आनन्दसंवविदुन्निद्राम् सवर्ण दीर्घ स्वरसन्धिः

पदवीमासाद्यानन्दसंविदुन्निद्राम् = पदवीमासाद्यानन्दसंवित् उन्निद्राम् जश्त्व व्यञ्जनसन्धिः

उन्निद्राम् – उत् + निद्राम् अनुनासिक व्यञ्जनसन्धिः

पदवीम्- path, road & respected status

पदवी (स्त्री) - अयनम्वर्त्म मार्गाध्वपन्थानः पदवी सृतिः। अर्थः – मार्गः

आसाद्य- having attained, having obtained, achieved

आनन्द - bliss

संवित्, enlightenment, spiritual knowledge

उन्निद्राम्, having awakened, budded, expanded as flower, (from nescience, ignorance, sleep);

उन्निद्राम्, having awakened (from nescience, ignorance, sleep); उद्गता निद्रामुद्रा यस्य, having awakened from deep sleep (MIS)

आस्ते भिक्षुक एको विहरन्निर्मुक्तबन्धनः स्वैरम्

आस्ते भिक्षुक एको विहरन्-निर्मुक्त-बन्धनः स्वैरम्

आस्ते – rests, exists

भिक्षुक एको = भिक्षुक: एको लोप: विसर्गसन्धि:

भिक्षुक एको = भिक्षुक: एको लोप: विसर्गसन्धि:

भिक्षुक - mendicant

भिक्षुक (-कः-की) भिक्षु + कन् or + उक ?

भिक्षु (पुं) - ब्रह्मचारी गृही वानप्रस्थो भिक्षुश्चतुष्टये। अर्थः - संन्यासाश्रमी

भिक्षु (पुं) - भिक्षुः परिव्राट्कर्मन्दी पाराशर्यपि मस्करी। अर्थः – संन्यासी

एको - one

विहरन्- roaming about

निर्मुक्त-बन्धनः – liberated from bondage (shedding bondage like armor or snakeskin)

निर्मुक्त (पुं) - मालुधानो मातुलाहिर्निर्मुक्तो मुक्तकञ्चुकः। अर्थः - मुक्तत्वचः सर्पः

बन्धन (नपुं) - आगोऽपराधो मन्तुश्च समे तूद्दानबन्धने। अर्थः – बन्धनम्

बन्धन (नपुं) - बन्धनं प्रसितिश्चारः स्पर्शः स्प्रष्टोपतप्तरि। अर्थः – बन्धनम्

स्वैरम् – free, self-willed, unrestrained

स्वैर (वि) - मन्दस्वच्छन्दयोः स्वैरः शुभ्रमुद्दीप्तशुक्लयोः। अर्थः – अलसः, स्वच्छन्दः

<u>समासा:</u>

आनन्दसंविदुन्निद्राम्

निर्मुक्तबन्धनः

वस्तुन्यस्तमिताखिलविश्वविहारे विलीनमनाः । राजति परानपेक्षो राजाऽखिलवीतरागाणाम् ॥५५॥

<u>अन्वय:</u>

विलीनमनाः अस्तमित वस्तुनि अखिलविश्वविहारे परानपेक्षो अखिलवीतरागाणाम् राजा राजति ॥५५॥

Mind dissolved and disappeared into the One, in the garden of the entire universe, independent of others, the King shines amongst those who have let go all attachments

<u>शब्दार्थ: विवरणं च</u>

वस्तुन्यस्तमिताखिलविश्वविहारे विलीनमनाः
वस्तुनि-अस्तम्-इत-अखिल-विश्व-विहारे विलीन-मनाः

वस्तुन्यस्तमिताखिलविश्वविहारे = वस्तुनि अस्तमित अखिलविश्वविहारे   यण स्वरसन्धिः, सवर्ण दीर्घ स्वरसन्धिः

वस्तुनि – in one thing

वस्तुनि – वस्तु शब्द, सप्तमी एक

अस्तम् – disappearence

अस्तम् - अव्यय

इत – gone to, returned

इत – इण् + क्त   (इण् धातु - एति इतः यन्ति)

अखिल – entire

अखिल (वि) - विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम्। अर्थः – समग्रम्

विश्व – universe

विश्व (नपुं) - विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम्। अर्थः - समग्रम्

विश्व (नपुं) - आदित्यविश्ववसवस्तुषिता भास्वरानिलाः। अर्थः – गणदेवता

विश्व (स्त्री-नपुं) - स्त्रीनपुंसकयोर्विश्वं नागरं विश्वभेषजम्। अर्थः – शुण्ठी

विहारे – in a garden, in wandering for pleasure

विलीन – sticking to, clung, dissolved, melted, fluid

विलीन (वि) - निष्प्रभे विगतारोकौ विलीने विद्रुतद्रुतौ। अर्थः - स्वतःप्राप्तद्रवीभावः

मनाः – mind

राजति परानपेक्षो राजाऽखिलवीतरागाणाम्
राजति पर- अनपेक्षो राजा-अखिल-वीत-रागाणाम्

राजति - shines

पर-अनपेक्षो – one not heeding others, independent of others

राजा- king

अखिल-वीत-रागाणाम् – amongst those who have set free all attachments

वीत (नपुं) - वीतं त्वसारं हस्त्यश्वं वारी तु गजबन्धनी। अर्थः – निर्बलहस्त्यश्वसमूहः

<u>समासा:</u>
अखिलविश्वविहारे
विलीनमनाः
अखिलवीतरागाणाम्

आचार्यापाङ्गदृशा समवाप्तापारसंविदाकारः । प्रशमितसकलविभेदः परहंसः कश्चिदाभाति ॥५६॥

<u>अन्वय:</u>

कश्चिद्, परहंसः आचार्यापाङ्गदृशा समवाप्त अपारसंविदाकारः, प्रशमितसकलविभेदः, आभाति ॥५६॥

Someone unique, a supreme swan (realized sage), as a consequence of a glance from the corner of his teacher's eye, having attained the limitless form of true knowledge, having calmed all differentiations, glows.

<u>शब्दार्थ: विवरणं च</u>

आचार्यापाङ्गदृशा समवाप्तापारसंविदाकारः

आचार्य-अपाङ्ग-दृशा समवाप्त-अपार-संविद्-आकारः

आचार्यापाङ्गदृशा = आचार्य आपाङ्गदृशा — सवर्ण दीर्घ स्वरसन्धिः

आचार्य- teacher, preceptor

आचार्य (पुं) - मन्त्रव्याख्याकृदाचार्य आदेष्टा त्वध्वरे व्रती। अर्थः – मन्त्रव्याख्याकर्ता

अपाङ्ग- the corner of the eye

अपाङ्ग (पुं) - अपाङ्गौ नेत्रयोरन्तौ कटाक्षोऽपाङ्गदर्शने। अर्थः - नेत्रप्रान्तः

अपाङ्ग (पुं) - गजेऽपि नागमातङ्गावपाङ्गस्तिलकेऽपि च। अर्थः – ललाटकृततिलकम्

दृशा – eye

दृशा – आकरान्त स्त्री, प्र एक

समवाप्तापारसंविदाकारः = समवाप्त अपारसंविदाकारः — सवर्ण दीर्घ स्वरसन्धिः

समवाप्तापारसंविदाकारः = समवाप्तापारसंवित् आकारः — जश्त्व व्यञ्जनसन्धिः

समवाप्त-one who has atained

अपार- limitless

संविद्- true knowledge

आकारः – form

प्रशमितसकलविभेदः परहंसः कश्चिदाभाति

प्रशमित-सकल-विभेदः परहंसः कश्चिद्-आभाति

प्रशमित – having calmed, pacified, soothed

सकल- all

सकल (वि) - समग्रं सकलं पूर्णमखण्डं स्यादनूनके। अर्थः – समग्रम्

विभेदः – divisions or separation

भेद (पुं) - भेदो दण्डः साम दानमित्युपायचतुष्टयम्। अर्थः - उपायाः

भेद (पुं) - भेदोपजापावुपधा धर्माद्यैर्यत्परीक्षणम्। अर्थः – भेदः

परहंसः – glorious swan (sage)

परमहंसः, पुंलिङ्गम् - परमहंस परमः हंस आत्मा यस्य सन्न्यासिभेदे, परमः श्रेष्ठः हंसः सोऽहं आत्मायस्य

कश्चिदाभाति = कश्चित् आभाति — जश्त्व व्यञ्जनसन्धिः

कश्चिद् – someone unique

आभाति – glows

आभाति – is a verb here. आभातिः also exists, स्त्री, प्र, एक

समासा:
आचार्यापाङ्गदृशा
आचार्यापाङ्गदृशा
समवाप्तापारसंविदाकारः
प्रशमितसकलविभेदः
परहंसः
कश्चिदाभाति

वर्णाश्रमव्यवस्थामुत्तीर्य विधूय विध्यादीन् । परिशिष्यते यतीन्द्रः परिपूर्णानन्दबोधमात्रेण ॥५७॥

अन्वय:
यतीन्द्रः, वर्णाश्रमव्यवस्थामुत्तीर्य, विधूय विध्यादीन्, परिपूर्णानन्दबोधमात्रेण परिशिष्यते ॥५७॥

The lord of ascetics, having overcome arrangements of caste and life-stages, having shaken off rites and rules etc., completely awakened to complete Knowledge of what remains.

शब्दार्थ: विवरणं च
वर्णाश्रमव्यवस्थामुत्तीर्य विधूय विध्यादीन्
वर्णाश्रम-व्यवस्थाम्-उत्तीर्य विधूय विध्य-आदीन्
वर्णाश्रमव्यवस्थामुत्तीर्य – वर्ण आश्रमव्यवस्थामुत्तीर्य सवर्ण दीर्घ स्वरसन्धिः
वर्णाश्रम – caste and station in life
वर्ण (पुं) - वंशोऽन्ववायः सन्तानो वर्णाः स्युर्ब्राह्मणादयः। अर्थः - ब्राह्मणादिवर्णचतुष्टयवाचकः
वर्ण (पुं) - प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथो द्वयोः। अर्थः - गजपृष्टवर्ती चित्रकम्बलः
वर्ण (पुं) - वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्णं तु वाक्षरे। अर्थः – शुक्लादयः, स्तुतिः, ब्राह्मणादिवर्णचतुष्टयवाचकः, अक्षरम्
आश्रम (पुं-नपुं) - आश्रमोऽस्त्री द्विजात्यग्रजन्मभूदेववाडवाः। अर्थः - ब्रह्मचर्यादिचतुष्टयस्य नाम
व्यवस्थाम् – arrangement
उत्तीर्य – climbing over, crossed, liberated
उत् + तॄ + ल्यप् - अव्यय
विधूय – having shaken
विधूय – वि + धू + ल्यप्
विध्यादीन् – विधि आदीन् यण स्वरसन्धिः
विधि – rules, rites
विधि (पुं) - स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृड्विधिः। अर्थः – ब्रह्मा brahma
विधि (पुं) - दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः। अर्थः – प्राक्तनशुभाशुभकर्मः Destiny
विधि (पुं) - ध्यानयोगासने ब्रह्मासनं कल्पे विधिक्रमौ। अर्थः - विधानशास्त्रम्

विधि (पुं) - विधिर्विधाने दैवेऽपि प्रणिधिः प्रार्थने चरे। अर्थः – विधानम्

आदीन् – etc.

परिशिष्यते यतीन्द्रः परिपूर्णानन्दबोधमात्रेण

परिशिष्यते यती-इन्द्रः परिपूर्ण-आनन्द-बोधमात्रेण

परिशिष्यते – to leave remaining

परिशिष्यते – परिशिष् Datu, आत्मनेपदी, परि + शिष्

यतीन्द्रः - यति इन्द्रः सवर्ण दीर्घ स्वरसन्धिः

यति-इन्द्रः – lord of ascetics

परिपूर्णानन्दबोधमात्रेण – परिपूर्ण आनन्दबोधमात्रेण सवर्ण दीर्घ स्वरसन्धिः

परिपूर्ण - total, complete, full

परिपूर्णता (स्त्री) - रचना स्यात्परिस्यन्द आभोगः परिपूर्णता। अर्थः - सर्वोपचारपरिपूर्णता

आनन्द –bliss

बोधमात्रेण – broad awakening of knowing, understanding, perceiving

मात्र - affix added to nouns in the sense of 'measuring as much as', 'as high or long, or broad as', 'reaching as far as',

मात्र (नपुं) - अल्पे च परिमाणे सा मात्रं कात्स्न्र्येऽवधारणे। नानार्थवर्गः । अर्थः - कात्स्न्र्यम्, अवधारणम्

<u>समासा:</u>

वर्णाश्रम

आनन्दबोधमात्रेण

क्षयमुपनीय समस्तं कर्म प्रारब्धमुपभुज्य । प्रविगलितदेहबन्धः प्राज्ञो ब्रह्मैव केवलं भवति ॥५८॥

<u>अन्वय:</u>

प्राज्ञः, समस्तं कर्म क्षयमुपनीय, प्रारब्धमुपभुज्य प्रविगलितदेहबन्धः, ब्रह्मैव केवलं भवति ॥५८॥

The enlightened one, having brought about destruction of all actions, having experienced/enjoyed that has already commenced (Prarabdha Karma), having dropped all bodily bondage, he indeed becomes the non-dual Brahman.

<u>शब्दार्थ: विवरणं च</u>

क्षयमुपनीय समस्तं कर्म प्रारब्धमुपभुज्य

क्षयम्-उपनीय समस्तं कर्म प्रारब्धम्-उपभुज्य

क्षयम् – loss, destruction

क्षयः - क्षि-अच्

क्षय (पुं) - संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि। अर्थः – प्रलयः Destruction of the universe

क्षय (पुं) - क्षयः शोषश्च यक्ष्मा च प्रतिश्यायस्तु पीनसः। अर्थः – राजयक्ष्मा

क्षय (पुं) - क्षयः स्थानं च वृद्धिश्च त्रिवर्गो नीतिवेदिनाम्। अर्थः - अष्टवर्गाणां क्षयः

क्षय (पुं) - आप्रच्छन्नमथाम्नायः सम्प्रदायः क्षये क्षिया। अर्थः - अपचयः

क्षय (पुं) - तुरङ्गगरुडौ तार्क्ष्यौ निलयापचयौ क्षयौ। अर्थः – गृहम्

उपनीय – having brought

समस्तं – entire

समस्त (वि) - विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम्। अर्थः – समग्रम्

कर्म – action (in compounds for कर्मन्)

प्रारब्धम् – what has begun, commenced

उपभुज्य – having tasted, enjoyed, eaten

उपभुज्य – उप भुज् ल्यप्

प्रविगलितदेहबन्धः प्राज्ञो ब्रह्मैव केवलं भवति

प्रविगलित-देह-बन्धः प्राज्ञो ब्रह्मैव केवलं भवति

प्रविगलित - dropped

प्रविगलित – प्र + वि + गल् + क्त

देह - body

देह (पुं-नपुं) - कायो देहः क्लीबपुंसोः स्त्रियां मूर्तिस्तनुस्तनूः। अर्थः – देहः

बन्धः – bonds

बन्धन (नपुं) - आगोऽपराधो मन्तुश्च समे तूद्दानबन्धने। अर्थः – बन्धनम्

बन्धन (नपुं) - बन्धनं प्रसितिश्चारः स्पर्शः स्प्रष्टोपतप्तरि। अर्थः – बन्धनम्

प्राज्ञो – wise one who has experienced

प्राज्ञ (पुं) - धीरो मनीषी ज्ञः प्राज्ञः संख्यावान्पण्डितः कविः। अर्थः – विद्वान्

ब्रह्मैव = ब्रह्म एव (नपुं), or ब्रह्मा एव (पुँ) वृद्धि स्वरसन्धिः

ब्रह्म-एव – brahman verily

ब्रह्मन् (पुं) - ब्रह्मा ब्रह्माणौ ब्रह्माणः

ब्रह्मन् (नपुं) - ब्रह्म ब्रह्मणी ब्रह्माणि

ब्रह्मन् (पुं) - ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामहः. अर्थः – ब्रह्मा brahma

केवलं - alone

केवल (नपुं) - निर्णीते केवलमिति त्रिलिङ्गं त्वेककृत्स्नयोः।अर्थः – निश्चितम्, एकः, समग्रम्

भवति – becomes

<u>समासा:</u>

समस्तं

प्रविगलितदेहबन्धः

स्तिमितमनन्तमनाद्यं सन्ततमानन्दबोधघनम् । अविकल्पमाद्यमेकं सन्मात्रं विद्यते किमपि ॥ ५१॥

<u>अन्वय:</u>

किमपि एकं स्तिमितम् अनन्तम् अनाद्यं अविकल्पम् आद्यम् सन्ततम् आनन्दबोधघनम् सन्मात्रं विद्यते ॥ ५१॥

That something unique (non-dual), calm, eternal, without beginning, unchangeable, primeval, uninterrupted mass of Bliss and knowledge, whose existence alone is real.

<u>शब्दार्थ: विवरणं च</u>

स्तिमितमनन्तमनाद्यं सन्ततमानन्दबोधघनम्

स्तिमितम्-अनन्तम्-अनाद्यं सन्ततम्-आनन्द-बोध-घनम्

स्तिमितम् – still, unruffled, calm

स्तिमित (वि) - आर्द्रं सार्द्रं क्लिन्नं तिमितं स्मितितं समुन्नमुत्तं च। अर्थः – क्लिन्नम्

अनन्तम् – endless, eternal, infinite

अनन्त (नपुं) - नभोऽन्तरिक्षं गगनमनन्तं सुरवर्त्म खम्। अर्थः – आकाशः sky

अनन्त (पुं) - शेषोऽनन्तो वासुकिस्तु सर्पराजोऽथ गोनसे। अर्थः - नागानाम् स्वामिः

अनन्त (वि) - कृत्रिमे लक्षणोपेतेऽप्यनन्तोऽनवधावपि। अर्थः – अनवधिः

अनाद्यं – without beginning, not edible

सन्ततम् - stretched, extended, uninterrupted, eternal

सन्तत (नपुं) – सततानारताश्रान्तसन्तताविरतानिशम्। अर्थः – अविरतम् continuous

आनन्द- bliss

आनन्द (पुं) - स्यादानन्दथुरानन्दः शर्मशातसुखानि च। अर्थः – आनन्दः। Joy

बोध – knowing, understanding, awakening

घनम् – dense, firm, hard

घन (पुं) – घनजीमूतमुदिरजलमुग्धूमयोनयः। अर्थः – मेघः cloud

घन (नपुं) - वंशादिकं तु सुषिरं कांस्यतालादिकं घनम्। अर्थः - कांस्यतालादिवाद्यम्

घन (नपुं) - विलम्बितं द्रुतं मध्यं तत्त्वमोघो घनं क्रमात्। अर्थः - मध्यसमयनृत्यगीतवाद्यम्

घन (पुं) - द्रुघणो मुद्गरघनौ स्यादीली करवालिका। अर्थः - मुद्गरः

घन (पुं) - घनं निरन्तरं सान्द्रं पेलवं विरलं तनु। अर्थः - निबिडम्

घन (पुं) - घनो मेघे मूर्तिगुणे त्रिषु मूर्ते निरन्तरे। अर्थः – कठिनगुणः, कठिनम्, निरन्तरम्

अविकल्पमाद्यमेकं सन्मात्रं विद्यते किमपि

अविकल्पम्-आद्यम्-एकं सन्मात्रं विद्यते किमपि

अविकल्पम् – absence of doubt, unchangeable

कल्प (पुं) - दैवे युगसहस्रे द्वे ब्राह्मः कल्पौ तु तौ नृणाम्। अर्थः - दैवम् युगसहस्रद्वयम्

कल्प (पुं) - संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि। अर्थः - प्रलयः

कल्प (पुं) - ध्यानयोगासने ब्रह्मासनं कल्पे विधिक्रमौ। अर्थः - विधानशास्त्रम्

कल्प (पुं) - अभ्रेषन्यायकल्पास्तु देशरूपं समञ्जसम्। अर्थः – नीतिः

आद्यम् – original, first, excellent

आद्य (वि) - पुंस्यादिः पूर्वपौरस्त्यप्रथमाद्या अथास्त्रियाम्। अर्थः – आद्यः

एकं - one

एक (वि) - साधारणं तु सामान्यमेकाकी त्वेक एककः। अर्थः - असहायः

एक (वि) - भिन्नार्थका अन्यतर एकस्त्वोऽन्येतरावपि। अर्थः - भिन्नार्थकाः

एक (वि) - वृन्दारकौ रूपिमुख्यावेके मुख्यान्यकेवलाः। अर्थः – अन्यः, केवलः, मुख्यः

सन्मात्रं = सत् मात्रं - अनुनासिक व्यञ्जनसन्धिः

सन्मात्रं – whose existence alone

विद्यते – is available

किमपि – that something (special)

किम् (अव्य) - तूष्णीमर्थे सुखे जोषं किं पृच्छायां जुगुप्सने। अर्थः - जुगुप्सनम्, प्रश्नः

किम् (अव्य) - आहो उताहो किमुत विकल्पे किं किमूत च। अर्थः – विकल्पनम्

समासा:

आनन्दबोधघनम्

सन्मात्रं

अक्षरमजरमजातं सूक्ष्मतरापूर्वशुद्धविज्ञानम् । प्रगलितसर्वक्लेशं परतत्त्वं वर्तते किमपि ॥ ६० ॥

अन्वय:

किमपि परतत्त्वं सूक्ष्मतर-अपूर्व-शुद्ध-विज्ञानम् अक्षरम् अजरम् अजातं प्रगलित-सर्व-क्लेशं वर्तते ॥ ६० ॥

An undecaying, never aging, never born, emptied of all pain and troubles, supreme essential nature exists, a Knowledge that is most subtle, extraordinary and pure.

शब्दार्थ: विवरणं च

अक्षरमजरमजातं सूक्ष्मतरापूर्वशुद्धविज्ञानम्

अक्षरम्-अजरम्-अजातं सूक्ष्मतर-अपूर्व-शुद्ध-विज्ञानम्

अक्षरम् – undecaying, imperishable, fixed

अक्षर (नपुं) - चक्रं राष्ट्रेऽप्यक्षरं तु मोक्षेऽपि क्षीरमप्सु च। अर्थः – मोक्षः

अजरम् – not subject to old age & decay

अजातं – unborn, not created

जात (नपुं) - जातिर्जातं च सामान्यं व्यक्तिस्तु पृथगात्मता। अर्थः – घटत्वादिजातिः A kind of thing

सूक्ष्मतर – more (most) minute or subtle

सूक्ष्म (वि) - स्तोकाल्पक्षुल्लकाः सूक्ष्मं श्लक्ष्णं दभ्रं कृशं तनु। अर्थः - सूक्ष्मम्

सूक्ष्म (नपुं) - सूक्ष्ममध्यात्ममप्याद्ये प्रधाने प्रथमस्त्रिषु। अर्थः – अध्यात्मम्

अपूर्व – strange, wonderful, extraordinary (not having existed before)

पूर्व (पुं) - नाभिजन्माण्डजः पूर्वो निधनः कमलोद्भवः। अर्थः - ब्रह्मा

पूर्व (पुं) - प्राच्यवाचीप्रतीच्यस्ताः पूर्वदक्षिणपश्चिमाः. अर्थः – दिङ्नाम east

पूर्व (पुं) - कुबेरः ईशः पतयः पूर्वादीनां दिशां क्रमात्. अर्थः – पूर्वदिक् east

पूर्व (वि) - पुंस्यादिः पूर्वपौरस्त्यप्रथमाद्या अथास्त्रियाम्. अर्थः – आद्यः

शुद्ध – pure, clean, purified, holy, spotless

विज्ञानम् – knowledge

विज्ञान (नपुं) - मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः। अर्थः – शिल्पादिविषयकबुद्धिः

प्रगलितसर्वक्लेशं परतत्त्वं वर्तते किमपि

प्रगलित-सर्व-क्लेशं परतत्त्वं वर्तते किमपि

प्रगलित – dripped down, dissolved, emptied, leaked away, decreased, exhausted

गलित (वि) - स्रस्तं ध्वस्तं भ्रष्टं स्कन्नं पन्नं च्युतं गलितम्। अर्थः – च्युतम्

सर्व – all

सर्व (वि) - गणनीये तु गणेयं संख्याते गणितमथ समं सर्वम्। अर्थः – समग्रम्

क्लेशं – pain, suggering, trouble

क्लेश (पुं) - आदीनवास्रवौ क्लेशे मेलके सङ्गसङ्गमौ। अर्थः – क्लेशः

परतत्त्वं – supreme essential nature

तत्त्व (नपुं) - विलम्बितं द्रुतं मध्यं तत्त्वमोघो घनं क्रमात्। अर्थः – विलम्बितनृत्यगीतवाद्यम्

वर्तते – abides, lives, remains

किमपि – someone special

किम् (अव्य) - तूष्णीमर्थे सुखे जोषं किं पृच्छायां जुगुप्सने। अर्थः – जुगुप्सनम्, प्रश्नः

किम् (अव्य) - आहो उताहो किमुत विकल्पे किं किमूत च। अर्थः – विकल्पनम्

<u>समासा:</u>

सूक्ष्मतरापूर्वशुद्धविज्ञानम्

प्रगलितसर्वक्लेशं

सुखतरममरमदूरं सारं संसारवारिधेस्तीरम् । समरसमभयमपारं तत्किञ्चन विद्यते तत्त्वम् ॥६१॥

<u>अन्वय:</u>

तत्किञ्चन तत्त्वम् विद्यते, सुखतरम् अमरम् अदूरं समरसम् अभयम् अपारं सारं संसारवारिधेः तीरम्, ॥६१॥

That One true nature exists, most blissful, without death, intimately close, equanimous to all, without fear, unbounded, the shore of the ocean of Samsara (relief from the entire world of difficulties).

शब्दार्थः विवरणं च

सुखतरममरमदूरं सारं संसारवारिधेस्तीरम्

सुखतरम्-अमरम्-अदूरं सारं संसार-वारिधेः-तीरम्

सुखतरम् -most blissful

अमरम् – undying

अमर (पुं) - अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः। अर्थः – देवः deva

अदूरं – not far

सारं – entire

सार (पुं) - सारो मज्जा नरि त्वक्स्त्री वल्कं वल्कलमस्त्रियाम्। अर्थः - वृक्षकोमलत्वक्

सार (वि) - सारो बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिषु। अर्थः - बलम् , स्थिरांशः , न्याय्यम् , वरः

संसारवारिधेस्तीरम् = संसारवारिधेः तीरम्

संसार- worldly

वारिधेः - ocean’s

तीरम् – shore, bank

तीर (नपुं) - कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु। अर्थः – तीरम्

समरसमभयमपारं तत्किञ्चन विद्यते तत्त्वम्

समरसम्-अभयम्-अपारं तत्-किञ्चन विद्यते तत्त्वम्

समरसम् – equanimity

रस (पुं) - रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी। अर्थः - रसनेन्द्रियविषयः

रस (पुं) - क्षारः काचोऽथ चपलो रसः सूतश्च पारदे। अर्थः - पारदः

रस (पुं) - वोलगन्धरसप्राणपिण्डगोपरसाः समाः। अर्थः - गन्धरसः

रस (पुं) - शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः। अर्थः – गुणः, रागः, शृङ्गारादिः, विषम्, वीर्यम्, द्रवः

अभयम् – fearlessness

अभय (नपुं) - अभयं नलदं सेव्यममृणालं जलाशयम्। अर्थः – वीरणमूलम्

भय (नपुं) - चतुर्दश दरस्त्रासो भीतिर्भीः साध्वसं भयम्. अर्थः - भयम्

अपारं - shoreless

पार (नपुं) - पारावारे परार्वाची तीरे पात्रं तदन्तरम्। अर्थः – परतीरम्

तत्-किञ्चन – that something

विद्यते – is available

तत्त्वम् – essential nature

समासाः

संसारवारिधि

अरसमगन्धमरूपं विरजस्कमसत्त्वमतमस्कम् । निरुपमनिर्भयतत्त्वं तत्किमपि द्योतते नित्यम् ॥६२॥

<u>अन्वय:</u>

तत् किमपि अरसमगन्धमरूपं विरजस्कमसत्त्वमतमस्कम् निरुपमनिर्भयतत्त्वं नित्यम् द्योतते ॥६२॥

That Essence, whatever it is, without taste, without odor, without form, devoid of Rajas, not Sattva, not Tamas, unequalled (not comparable), fearless, always shines.

<u>शब्दार्थ: विवरणं च</u>

अरसमगन्धमरूपं विरजस्कमसत्त्वमतमस्कम्

अरसम् अगन्धम् अरूपं विरजस्कम् असत्त्वम् अतमस्कम्

अरसम् – without taste

रस (पुं) - रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी। अर्थः - रसनेन्द्रियविषयः

रस (पुं) - क्षारः काचोऽथ चपलो रसः सूतश्च पारदे। अर्थः - पारदः

रस (पुं) - वोलगन्धरसप्राणपिण्डगोपरसाः समाः। अर्थः - गन्धरसः

रस (पुं) - श्रृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः। अर्थः -गुणः, रागः, श्रृङ्गारादिः, विषम्, वीर्यम्, द्रवः

अगन्धम् – odorless

गन्ध (पुं) - रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी। अर्थः – घ्राणेन्द्रियविषयः

अरूपं – formless

रूप (नपुं) - रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी। अर्थः – नेत्रेन्द्रियविषयः

विरजस्कम् – devoid of rajas

रजस् (नपुं) - विशेषः कालिकोऽवस्था गुणाः सत्त्वं रजस्तमः। अर्थः – गुणः Guna

रजस् (नपुं) - ऋतुमत्यप्युदक्यापि स्याद्रजः पुष्पमार्तवम्। अर्थः - आर्तवम्

रजस् (नपुं) - रेणुर्द्वयोः स्त्रियां धूलिः पांसुर्ना न द्वयो रजः। अर्थः – रजः

असत्त्वम् – not sattva

सत्त्व (नपुं) - विशेषः कालिकोऽवस्था गुणाः सत्त्वं रजस्तमः। अर्थः – गुणः Guna

सत्त्व (नपुं) - द्रव्यासु व्यवसायेऽपि सत्त्वमस्त्री तु जन्तुषु। अर्थः – शरीरवायुः, वस्तु, व्यवसायः, जन्तुः

अतमस्कम् – not tamas

तमस् (नपुं) - तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुन्तुदः। अर्थः – राहुः rahu

तमस् (नपुं) - विशेषः कालिकोऽवस्था गुणाः सत्त्वं रजस्तमः। अर्थः – गुणः Guna

तमस् (नपुं) - अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः। अर्थः - अन्धकारः

तमस् (नपुं) - रजो गुणे च स्त्रीपुष्पे राहौ ध्वान्ते गुणे तमः। अर्थः – राहुः

निरुपमनिर्भयतत्त्वं तत्किमपि द्योतते नित्यम्

निरुपम निर्भय-तत्त्वं तत् किमपि द्योतते नित्यम्

निरुपम –unequalled, no comparsion

निर्भय – fearless

तत्त्वं – essence

तत् किमपि – that what ever
द्योतते – shines
नित्यम् – always
नित्य (नपुं) - नित्यानवरताजस्रमप्यथातिशयो भरः। अर्थः – अविरतम् continuous
नित्य (वि) - शाश्वतस्तु ध्रुवो नित्यसदातनसनातनाः। अर्थः – नित्यम्

समासा:
निरुपमनिर्भयतत्त्वं

इति गुरुकरुणापाङ्गादार्याभिर्ह्यधिकषष्टिसङ्ख्याभिः । निरवद्याभिरवोचं निगमशिरस्तन्त्रसारभूतार्थम् ॥

अन्वय:
इति गुरुकरुणापाङ्गाद्: आर्याभि: ह्यधिकषष्टिसङ्ख्याभिः निरवद्याभिः, निगमशिरस्तन्त्रसारभूतार्थम्, अवोचं ॥

Thus, as a consequence of a mere side-glance from the corner of my Guru's eyes, in the Arya meter, in the count of two above sixty, in faultless (verses), the meaning of the main matter of the science that is the crown of the Vedas (Upanishads), I spoke

शब्दार्थ: विवरणं च
इति गुरुकरुणापाङ्गादार्याभिर्ह्यधिकषष्टिसङ्ख्याभिः
इति गुरुकरुणापाङ्गाद् आर्याभि: ह्यधिक-षष्टि-सङ्ख्याभिः
इति - thus
गुरुकरुणापाङ्गादार्याभिर्ह्यधिकषष्टिसङ्ख्याभिः = गुरुकरुणापाङ्गात् आर्याभिर्ह्यधिकषष्टिसङ्ख्याभिः जशत्व व्यञ्जनसन्धि:
गुरुकरुणापाङ्गादार्याभिर्ह्यधिकषष्टिसङ्ख्याभिः = गुरुकरुणापाङ्गादार्याभि: ह्यधिकषष्टिसङ्ख्याभिः रेफ: विसर्गसन्धि
गुरुकरुणापाङ्गाद् – because of a kind side-glance of guru
गुरु (पुं) - बृहस्पतिः सुराचार्यो गीर्पतिर्धिषणो गुरुः। अर्थः – बृहस्पतिः jupiter
गुरु (पुं) - उपाध्यायोऽध्यापकोऽथ स्यान्निषेकादिकृद्गुरुः। अर्थः – संस्कारादिकर्तुर्गुरुः
करुणा (स्त्री) – श्रृङ्गारवीरकरुणाद्भुतहास्यभयानकाः। अर्थः - नवरसेष्वेकः
करुणा (स्त्री) - उत्साहवर्धनो वीरः कारुण्यं करुणा घृणा। अर्थः – करुणरसः
आर्याभि: - in the meter Arya
आर्या (स्त्री) - आर्या दाक्षायणी चैव गिरिजा मेनकात्मजा। अर्थः – पार्वती Parvati
ह्यधिक – two above
ह्यस् (अव्य) - ह्यो गतेऽनागतेऽह्नि श्वः परश्वस्तु परेऽहनि। अर्थः - अतीते अह्नि
अधिक (वि) - नीवी परिपणो मूलधनं लाभोऽधिकं फलम्। अर्थः – अधिकफलम्
षष्टि – sixty
सङ्ख्याभिः – in the count of

सङ्ख्या (स्त्री) - चित्ताभोगो मनस्कारश्चर्चा संख्या विचारणा। अर्थः – विचारणम्

निरवद्याभिरवोचं निगमशिरस्तन्त्रसारभूतार्थम्

निरवद्याभि:-अवोचं निगमशिर:-तन्त्र-सारभूत-अर्थम्

निरवद्याभिरवोचं = निरवद्याभि: अवोचं रेफ: विसर्गसन्धि

निरवद्याभि: - in blameless

अवद्य (वि) - कुपूयकुत्सितावद्यखेटगर्ह्याणकाः समाः। अर्थः – अधमम्

अवोचं – I spoke

अवोचम् – ब्रू धातु, अदादि: गण, परस्मैपदी, द्विकर्मक:

वच् धातु, अदादि: गण, परस्मैपदी, द्विकर्मक: ; कर्तरि लुङ्लकारः (परस्मैपदम्) ; प्रथम पु - अवोचत्, अवोचद् अवोचताम् अवोचन्

वच् धातु, चुरादि: गण, सकर्मक: ; प्रथम पु - अवीवचत्, अवीवचद्, अवोचत्, अवोचद् अवीवचताम्, अवोचताम् अवीवचन्, अवोचन्

निगमशिरस्तन्त्रसारभूतार्थम् = निगमशिरस्तन्त्रसारभूत अर्थम् सवर्ण दीर्घ स्वरसन्धि:

निगमशिर: - crown of vedas

निगम (पुं) - स्थानीयं निगमोऽन्यत्तु यन्मूलनगरात्पुरम्। अर्थः - नगरम्

निगम (पुं) - वणिक्पथः पुरं वेदो निगमो नागरो वणिक्। अर्थः - मूलनगरादन्यनगरम्, वणिक्पथः, वेदः

शिरस् (पुं-नपुं) - शिरोग्रं शिखरं वा ना मूलं बुध्नोऽङ्घ्रिनामकः। अर्थः - शिखरम्

शिरस् (नपुं) - उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम्। अर्थः - शिरः

शिरस्य (पुं) - वेणी प्रवेणी शीर्षण्यशिरस्यौ विशदे कचे। अर्थः - निर्मलकेशः

शिरस् (नपुं)- कुम्भौ तु पिण्डौ शिरसस्तयोर्मध्ये विदुः पुमान्. अर्थः – गजमस्तकौ

तन्त्र – science

तन्त्र (नपुं) - तन्त्रं प्रधाने सिद्धान्ते सूत्रवाये परिच्छदे। अर्थः - परिच्छदः, प्रधानम्, सिद्धान्तः, सूत्रवायः

सारभूत – the main matter, most excellent

अर्थम् – meaning

अर्थ (पुं) - हिरण्यं द्रविणं द्युम्नमर्थरैविभवा अपि। अर्थः - द्रव्यम्

अर्थ (पुं) - अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु। अर्थः – अभिधेयः, निवृत्तिः, प्रयोजनम्, वस्तु

<u>समासा:</u>

गुरुकरुणापाङ्गात्

द्व्यधिकषष्टिसङ्ख्याभिः

निगमशिरस्तन्त्रसारभूत

गदितमिममात्मविद्याविलासमनुवासरं स्मरन्विबुधः । परिणतपरात्मविद्यः प्रपद्यते सपदि परमार्थम् ॥

<u>अन्वय:</u>

विबुधः, गदितम् अनुवासरं स्मरन् इमम् आत्मविद्याविलासम्, परिणतपरात्मविद्यः परमार्थम् सपदि प्रपद्यते ॥६४॥

A learned person, understanding and remembering everyday this Cavorting with Self-Knowledge, is transformed into a knower of the highest Self, instantly enters (steps into) the highest Truth.

<u>शब्दार्थ: विवरणं च</u>

गदितमिममात्मविद्याविलासमनुवासरं स्मरन्विबुधः

गदितम्-इमम्-आत्म-विद्या-विलासम्-अनुवासरं स्मरन् विबुधः

गदितम् – having distilled, having drawn out

गदितम्- गड् धातु, क्त प्रत्यय

इमम् – this

आत्म – Self, Essence

आत्मन् (पुं) - क्षेत्रज्ञ आत्मा पुरुषः प्रधानं प्रकृतिः स्त्रियाम्। अर्थः – आत्मा Soul

आत्मन् (पुं) - आत्मायत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च। अर्थः – ब्रह्मा, बुद्धिः

विद्या – knowledge

विलासम् – pastime, play (with beloved)

विलास (पुं) - स्त्रीणां विलासबिब्बोकविभ्रमा ललितं तथा। अर्थः - स्त्रीणाम् श्रृङ्गारभावजाः क्रिया

अनुवासरं - everyday

वासर (पुं-नपुं) - घस्रो दिनाहनी वा तु क्लीबे दिवस वासरौ। अर्थः – दिवसः day

घस्र (पुं) दिन (नपुं) अहन् (नपुं) दिवस (पुं-नपुं) वासर (पुं-नपुं) +वार (पुं-नपुं)

स्मरन् – remembering

विबुधः – learned person

बुध (पुं) - बुधो बृहस्पतिश्चेति दिशां चैव तथा ग्रहाः। अर्थः - उत्तरदिशायाः ग्रहः planet of the W

बुध (पुं) - रौहिणेयो बुधः सौम्यः समौ सौरिशनैश्चरौ। अर्थः – बुधः mercury

बुध (पुं) - विद्वान्विपश्चिद्दोषज्ञः सन्सुधीः कोविदो बुधः। अर्थः – विद्वान्

परिणतपरात्मविद्यः प्रपद्यते सपदि परमार्थम्

परिणत–परात्म–विद्यः प्रपद्यते सपदि परमार्थम्

परिणत – perfected, transformed

परात्म – higher Self

विद्यः - knowledge

प्रपद्यते – steps into, surrenders into

सपदि – instantly, in the same instant

सपदि - अव्ययः - सह + पद् + इन्

परमार्थम् = परम अर्थम् सवर्ण दीर्घ स्वरसन्धिः

परमार्थम् – highest truth, most excellent goal

परिणत (वि) - पक्वं परिणते गूनं हन्ने मीढं तु मूत्रिते। अर्थः - परिणामं प्राप्तः

सपदि (अव्य) - द्राग्झटित्यञ्जसाह्नाय द्राङ्मङ्क्षु सपदि द्रुते। अर्थः - तत्क्षणम्

सपदि (अव्य) - मौने तु तूष्णीं तूष्णीकां सद्यः सपदि तत्क्षणे। अर्थः - तत्क्षणम्

समासा:
आत्मविद्याविलासम्
परिणतपरात्मविद्यः
परमार्थम्

परमशिवेन्द्रश्रीगुरुशिष्येणेत्थं सदाशिवेन्द्रेण । रचितेयमात्मविद्याविलासनाम्नी कृतिः पूर्णा ॥ ६५ ॥

अन्वय:
परमशिवेन्द्रश्रीगुरुशिष्येणेत्थं सदाशिवेन्द्रेण रचित, इयम् आत्मविद्याविलासनाम्नी कृतिः पूर्णा ॥ ६५ ॥

In this manner, written by the disciple Sadashivendra of the Blessed Guru ParamaShivendra, this work named Atma Vidya Vilasah is complete.

शब्दार्थ: विवरणं च
परमशिवेन्द्रश्रीगुरुशिष्येणेत्थं सदाशिवेन्द्रेण
परमशिवेन्द्रश्रीगुरुशिष्येण इत्थं सदाशिवेन्द्रेण
परमशिवेन्द्रश्रीगुरुशिष्येण by the disciple of the blessed Paramashivendra guru
इत्थं -in this manner
सदाशिवेन्द्रेण – by Sadashivendra
रचितेयमात्मविद्याविलासनाम्नी कृतिः पूर्णा
रचित-इयम-आत्मविद्याविलासनाम्नी कृतिः पूर्णा
रचित – written
रचित – रच् धातु, क्त प्रत्यय
इयम – this
आत्मविद्याविलासनाम्नी – having the name AtmaVidyaVilas
कृतिः - creation
कृति: - कृ धातु, क्तिन् प्रत्यय
पूर्णा - complete

समासा: